॥ श्रीः ॥

कालिदासचयनिप्रणीता

शुद्धिचन्द्रिका

विद्यावागीशकृतटीकासहिता

प्रभा-समलङ्कृता

डॉ० विश्वनाथस्वाईं

5963

ABB 22/9/2000

धर्मशास्त्र



KĀLIDĀSA CAYANĪ'S

ŚUDDHI CANDRIKĀ

and

Commentary of Vidyāvāgīśa

Edited with note "PRABHĀ" and introduction

by

Dr. Biswanath Swain

Department of Dharmashastra

Sri Jagannatha Veda Karmakanda Mahavidyalaya

Puri, Orissa, India

KĀLIDĀSA CAYANĪ'S
ŚUDDHI CANDRIKĀ
and Commentary of VIDYĀVĀGĪŚA
with note PRABHĀ.

Publisher :
Sri Jagannth Prasad Swain
C/o. Dr. B. N. Swain
Sarvodaya Nagar,
Puri - 752002.

First Edition :
17. 01. 2000

1000 copies.

Available at :
SAMVIDI
15, Mahodadhi Market
Puri-752001.

Price :
Rs. 80.00

Printed at :
Composed by : S. A. Computers
Mausima Temple Lane, Puri-1.

Offset Print by : Duduly Offset
231, Bapuji Nagar, BBSR.

Vidvanmani
Dr. Keshab Chandra Dash
M.A., M.Phil. Ph.D., D. Litt.
Acharya (M.A.) Parangata (M.A) Ratna (M.A.)
Diploma in German, French,
Film Direction & Computer Programming.



Professor & Head
Deptt. of Nyaya Darshan
Sri Jagannath Sanskrit University
Shri Vihar, Puri- 752003

Res. "SHASHIREKHA", University Road, Puri- 752003, Ph (06752) 24820

Ref.................................. Date 15. 01. 2000

FOREWORD

When we talk of global outreach of new technologies like teleconforencing, webcasting and internet puzzles the onset of today's collapse of human basics has largely focused an urge for peace. In this context, the normalization of relation in different spheres requires sharp vision to upgrade human values on the vulnerable frontlines.

On steps in considering the ancient outlook we find different handrails of texts which support the human goals from primary level to the level of ultmate reality. The book **Śuddhicandrikā** is a stair-structure on the processing point of purification.

The book relates to four major category of impurity namely : 1. Jananāśauca 'impurity on birth', 2. Garbhasrāvāśauca 'menstrul impurity', 3. Samsargāśauca 'relational impurity' and 4. Maraṇāśauca 'impurity on death'. This, as a whole, admonishes bio-physical cautions on a domestic profile.

Dr. Biswanath Swain - an unassuming scholar of the discipline has prepared an elaborate commentary of the text named **Prabhā** which is both scholarly and critical. Dr. Swain deserves acclaim for his sharp acumen in bringing philosophical issues and implications as accessories on lines under discussion.

Hope, learned critics and scholars would take keen interest in such a scholastic endeavour.

Keshab Chandra Dash

भूमिका

विदितमेव तत्रभवतामास्तिकजनानां यदिह अनेकजन्मार्जित-पुण्यप्रभावैर्जीवो मनुष्यशरीरं लभते । मनुष्यशरीरं लब्ध्वाऽपि भवदुःख-सागरपारनिमित्तं नैव सर्वो जीवः प्रभवति, किन्तु असकृद्गर्भवासमनुभवितुं प्रवर्त्तते । पुण्यं पापं चात्र वैषम्ये कारणम् । पुण्यपापयोश्च मूलं प्राणिकर्त्तृकं कर्म । अतएव किं कर्म पुण्यजनकं किञ्च पापजनकमिति गवेषणीयम् । तत्तत्कर्मबोधको वेद एव । वेदात् सर्वेषां यथार्थज्ञानं न सम्भवति । तस्मात् वैदिकैर्मनुयाज्ञवल्क्यगौतमवशिष्ठादिमहर्षिभिः वेदतत्त्वार्थाभिधायकाः कृत्याकृत्यप्रतिपादकाः स्मृतयः उपनिबद्धाः ।

स्मृतिः धर्मशास्त्रम् । तदुक्तं मनुना(२/१०) यथा–

श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः । इति ।

धर्मशास्त्रस्य उपादेयता महती वर्त्तते । तदुक्तं मनुना ((१/१०६, १०७) यथा–

इदं स्वस्त्ययनं श्रेष्ठमिदं बुद्धिविवर्धनम् ।
इदं यशस्यमायुष्यमिदं निःश्रेयसं परम् ।।
अस्मिन्धर्मोऽखिलेनोक्तो गुणदोषौ च कर्मणाम् ।
चतुर्णामपि वर्णानामाचारश्चैव शाश्वतः ।। इति ।

आचार-व्यवहार-प्रायश्चित्तभेदेन पादत्रितयविशिष्टं सकलं धर्मशास्त्रम् ।

अत्र धर्मस्य प्राधान्याद्धर्मग्रहणम् । यद्यप्यर्थकामयोरेतस्मिन् धर्मशास्त्रे प्रतिपादनमस्ति तथापि तुरीयपुरुषार्थमोक्षसिद्ध्यर्थं तयोः सर्वथाऽनुपयो-गितया प्रतिबन्धकतया च अप्राधान्यम् । धर्ममूलत्वात्तयोर्वा प्राधान्यम् । धर्मश्च अद्वेषरागिभिः सद्भिर्विद्वद्भिराचरित एव । तदुक्तं मनुना(२/१) यथा-

विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः ।
हृदयेनाभ्यनुज्ञातो यो धर्मः .... ।। इति ।

धर्मशब्दश्च षड्विधस्मार्त्तधर्मविषयः । तद्यथा- वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, साधारणधर्मश्चेति ।

धर्मसम्पादनार्थं प्रत्येकं कर्म शुचिना कर्त्तव्यम् । अतएव शुद्धेः कर्माङ्गत्वम् । स्फुटीकृतमेतत् विष्णुना यथा–

स्नातोऽधिकारी भवति दैवे पित्र्ये च कर्मणि ।
पवित्राणां तथा जाप्ये दाने च विधिचोदिते ॥ इति ।

शुद्धेः कारणमपि कर्म भवति । एकादशशुद्धिहेतुनिरूपणप्रसङ्गे याज्ञवल्क्येन एतत् प्रतिपादितम् । तद्यथा(३/३१)–

कालोऽग्निः कर्म मृद्वायुर्मनो ज्ञानं तपो जलम् ।
पश्चात्तापो निराहारः सर्वेऽमी शुद्धिहेतवः ॥ इति ।

कालो दशरात्रादिकः । अन्यत्सर्वं सुस्पष्टम् ।

शौचाभावोऽशौचम् । धर्मसम्पादनाधिकारसङ्कोचहेतुभूतं तत् विज्ञायते। तदुक्तं देवणभट्टेन स्वकृत-स्मृतिचन्द्रिकायामाशौचकाण्डे (पृ-१) यथा–

सपिण्डादिजनने मरणे वा यदप्रायत्यं दानादिधर्मेष्वयोग्यत्वलक्षणं पापविशोधात्मकं वा भवति तदाशौचशब्देन बोद्धव्यम् । अयमेवाशौचशब्दार्थ इत्युपदिष्टः । इति ।

बाह्यम् आभ्यन्तरं चेति भेदेन अशौचं द्विविधम् । स्पर्शभक्षणादिजन्यं शारीरकर्मानर्हत्वरूपं प्रथमम् । नित्यनैमित्तिकादिजन्यं प्रायश्चित्तापनोद्यम् अघलक्षणं कर्त्त्रशौचं द्वितीयम् । पुनश्च अशौचमिदं जननाशौचं, मरणाशौचं, रजःस्रावाशौचं, गर्भस्रावाशौचं, संसर्गाशौचं चेत्यादि-भेदविशिष्टं भवति ।

शुद्धिव्यवस्थामधिकृत्य अनेकैः स्मृतिग्रन्थाः प्रणीताः । तेषु उत्कलीयस्मृतिकारः कालिदासचयनी अन्यतमः । कालिदासचयनी श्रीजगन्नाथपुरीप्रान्तीयबीरबलभद्रपुरशासनग्रामनिवासी आसीत् । असौ नित्याचारप्रदीपकारनरसिंहवाजपेयिनः पूर्ववर्त्ती । कालिदासचयनिनः कालः पंञ्चदशशताब्द्याः द्वितीयार्द्धभागः । कालिदासचयनिकृता शुद्धिचन्द्रिका स्मृतिशास्त्रे विशिष्टं स्थानं धत्ते । शुद्धिचन्द्रिका सप्तविंशतिपद्यविशिष्टा । कालिदासेन शुद्धिचन्द्रिकायां कृत्यकल्पतरुकार-लक्ष्मीधरभट्टस्य नामोल्लेखः कृतः । ग्रन्थरत्नेऽस्मिन् जनन-मरण-रजःस्राव-गर्भस्रावाद्यशौचशुद्धिविषयाः प्रतिपादिताः । नक्षत्रमालाविभूषिता चन्द्रिका यथा तमो विनाशयति तथेयं शुद्धिचन्द्रिका अशौचरूपतमोविनाशाय लोके नितरां दिव्यति ।

विद्यावागीश-धनञ्जय-शान्तिरथादयः शुद्धिचन्द्रिकायाः प्रसिद्धाः

टीकाकाराः । एतत्कृताः टीकाः अप्रकाशिताः वर्त्तन्ते । तत्र विद्यावागीशकृता टीका प्राचीनतमेति ज्ञायते । एतासां प्रतिलिपयः तालपत्रमातृकाकारेण उपलभ्यन्ते । विद्यावागीशेन विज्ञानेश्वरः स्मर्यते। असौ विद्यावागीशः एकाम्रक्षेत्रनिवासी आसीत् ।

ग्रन्थस्यास्य सम्पादने मया पञ्चमातृकाः आधारीकृताः । तासु तिस्रः उत्कलराज्यसङ्ग्रहालये उपलभ्यन्ते। तासां क्रमसंख्या यथा—L/235 (B), Dh/68, Dh/147 (A) । तत्र प्रथमा मातृका मया मूलरूपेण स्वीकृता। अन्यमातृकाद्वयं क्रमानुसारं 'क' 'ख' चेति संज्ञाभ्यां मया व्यवहृतम् । एका मातृका श्रीजगन्नाथवेदकर्मकाण्डमहाविद्यालयस्य लब्धावसर-कर्मकाण्डप्राध्यापकपण्डितकाशीनाथकरशर्मणां गृहात् मया आसादिता। अस्याः मातृकायाः संज्ञा 'घ' इति मया कृता । अपरा मातृका श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य प्राध्यापकडॉ० जयकृष्णमिश्र-महोदयात् मया प्राप्ता । एतेभ्यः कृतज्ञतां विनिवेदयामि ।

श्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठकर्त्तृपक्षैः प्रो० केशवचन्द्रदाश-महोदयैश्च अहं प्रचोदितः। एतेभ्यः मम कृतज्ञतां विनिवेदयामि । अनुजकल्पस्य प्राध्यापकस्य डॉ० कमलेशमिश्रस्य सहायता मया स्वीकृता। एतस्मात् सोऽपि धन्यवादार्हः ।

पाठकैः सहृदयैः सूरिभिश्च मत्कृतास्त्रुटयो मार्जनीया इति सम्प्रार्थ्य विरमामि । इति शम् ।

विदुषामनुचरः

विश्वनाथस्वाईं

श्रीजगन्नाथवेदकर्मकाण्डमहाविद्यालयः,

पुरी ।

पौषशुक्लैकादशी।

दि० १७ । १ । २०००

विषयानुक्रमणिका

शुद्धिचन्द्रिका

(श्रीष्टदेवतायै नमः ।)

मन्वादि[१]शास्त्रामृतसञ्चयालयः
श्रीकालिदासाभिधधीरचन्द्रमाः ।
तेने सुधीसिन्धुविवर्द्धयशौचक-
ध्वान्तान्धलोकेक्षणशुद्धिचन्द्रिकाम् ॥ १ ॥

विद्यावागीश-टीका

ॐ नमः श्रीगणेशाय तस्मै विघ्नविनाशिने ।
यत्पादाभ्यर्च्चनाद्देवाः प्राप्नुवन्ति मनीषितम् ॥[अ]

[आ]कायमनोभ्याम् [इ]अभिमतदेवतानमस्कारपुरःसरं वस्तुनिर्द्देशमुखेन प्रयोजनाभिधेयं कथयति—मन्वादीति। सुधीसिन्धुविवर्द्धी कालिदासाख्य-धीरचन्द्रमाः । शुद्धिचन्द्रिकेति ग्रन्थस्य नाम । तां तेने इति सम्बन्धः ।

विघ्नौघनाशनं नौमि क्षेत्रेशीं विमलां तथा ।
सुदर्शनं जगन्नाथं भद्राहलिसमन्वितम् ॥
कालिदासकृतौ शुद्धिचन्द्रिकायां स्मृताविह ।
विद्यावागीशटीकायाः क्रियते टिप्पणी ''प्रभा'' ॥

१- ''मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते'' इत्यादिमहाभाष्यकारोक्तिः (३/१) वर्त्तते । अतो यस्य कस्यचिच्छास्त्रस्य निर्विघ्नपरिसमाप्तिनिमित्तमवश्यं मङ्गलाचरणं विधेयम् । मङ्गलाचरणम् आशीर्वादात्मकं नमस्कारात्मकं वस्तुनिर्देशात्मकश्चेति त्रिविधम् । तदुक्तं काव्यादर्शे (१/१४) यथा–

आशीर्नमस्क्रिया वस्तुनिर्द्देशो वाऽपि तन्मुखम् ॥ इति ।

श्रीकालिदासचयनी शुद्धिचन्द्रिकानामधेयस्य धर्मशास्त्रीयग्रन्थस्य प्रारम्भे मङ्गलमाचरति मन्वादीति । मङ्गलाचरणमिदं वस्तुनिर्द्देशात्मकम्। अत्र पद्यस्यादौ मनुनामनिर्द्देशो मङ्गलार्थः, परमात्मन एव संसारस्थितये

पाठान्तरम्—
अ- मङ्गलाचरणपद्यमिदं नास्ति क-ख-ग-मातृकासु ।
आ- अथ- इति क-ग-मातृकाद्वयेऽधिकपाठः ।
इ- अभीष्ट- इति क-मातृकायाम् ।

सर्वतः सारतया परममाधुर्यादिगुणेन च मन्वादि[अ]शास्त्राण्येव[२] अमृतम् । तत्सञ्चयस्य आलयः आश्रयः । अतएव चन्द्रत्वेन निरूपणम् । तद्विवर्द्धनशीलस्तेषां गाम्भीर्यादिगुणयोगेन सुधिय एव सिन्धव इति । तद्विवर्द्धनशीलस्तेषां बोधविवृद्धिहेतुत्वात् । अज्ञानहेतुत्वेन [३]अशौचमेव ध्वान्तमिति । तेनान्धा ये लोकास्तेषामीक्षणाय दर्शनाय शुद्धिरेव चन्द्रिकेति । चन्द्रिकादर्शनहेतुतया शुद्धेश्चन्द्रिकात्वेन निरूपणम् । अशौचतमसा व्यामुग्धानां शुद्धिविधानाय ग्रन्थोऽयं चन्द्रिकेव प्रकाशत इति भावः ॥१॥

इह यद्यपि अशौचशुद्धिविधायकानि मनुयाज्ञवल्क्यादीनां वाक्यानि प्रमाणभूतानि भूयांसि सन्ति तथापि तेषां बहुत्वात् क्वचिदस्फुटत्वात्

सार्वैश्वर्यादिसम्पन्नमनुरूपेण प्रादुर्भूतत्वात्तदभिधानस्य मङ्गलातिशयत्वात् । तदुक्तं मनुस्मृतौ (१२/१२३) यथा–

एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम् ।
इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम् ॥ इति ।

''अशौचकध्वान्तान्धलोकेक्षणशुद्धिचन्द्रिकाम्'' इत्यनेन शुद्धिरूपकं वस्तु निर्दिशति मङ्गलाचरणमिदम् । अत्र टीकाकारो विद्यावागीशश्चापि ''ॐ नमः श्रीगेणेशाय'' इति ब्रुवन् नमस्कारात्मकं मङ्गलाचरणं प्रस्तौति ।

२- मन्वादिभिः प्रणीतानि धर्मशास्त्राणि साक्षाद्वेदार्थानुमापकत्वेन वेदवत्प्रमाणभूतानि परमपवित्राणि अमृतमयानि भवन्ति । तत्र मनोः प्रशंसा छान्दोग्यब्राह्मणे श्रूयते यथा–

मनुर्वै यत्किञ्चिदवदत्तद्भेषजं भेषजतायाः ।

इतिमन्वर्थमुक्तावलीधृत(मनु० १/१) बृहस्पतिवचनादपि मनोः प्राधान्यं ज्ञायते। तद्यथा–

वेदार्थोपनिबद्धत्वात्प्राधान्यं हि मनोः स्मृतम् ।
मन्वर्थविपरीता तु या स्मृतिः सा न शस्यते ॥
तावच्छास्त्राणि शोभन्ते तर्कव्याकरणानि च ।
धर्मार्थमोक्षोपदेष्टा मनुर्यावन्न दृश्यते ॥ इति ।

३- अशौचलक्षणमुक्तं याज्ञवल्क्यमिताक्षरा(३/१)कारेण विज्ञानेश्वरेण यथा-

''आशौचशब्देन च कालस्नानाद्यपनोद्यः पिण्डोदकदानादिविधेः अध्ययनादिपर्युदासस्य च निमित्तभूतः पुरुषगतः कश्चनातिशयः कथ्यते, न पुनः कर्मानधिकारमात्रम् ।'' इति ।

अ- मन्वादिधर्मशास्त्राणि- इति ग-मातृकायाम् ।

विप्रक्षत्रिययोः सपिण्डजनने शुद्धिर्दशद्वादशा-
होरात्रैरथ पक्षकोपरि विशः शूद्रस्य मासात्परम् ।
पुत्रीमज्जनतोऽथ सर्वजननीस्पर्शे दशाहाच्छुचिः
कर्मार्हा द्विदशाहतः पुरुषसूर्मासात्परं स्त्रीप्रसूः ॥ २ ॥

क्वचिदन्योन्यविरुद्धाभिधानेनाव्यवस्थितविषयत्वाच्च तान्येवोपजीव्य स्वसंस्मरणाय सुधियाञ्च बोधाय स्फुटमतिसाराभिधानपुरःसरं व्यवस्थितविषयैः पञ्चविंशतिश्लोकैर्नानाविधाशौचशुद्धिसङ्ग्रहायायमारम्भः।

तत्र प्रसक्तमेव प्रसिद्ध्यतीतिन्यायेन शुद्धेरशौचाभावरूपत्वात् अशौचं कथं प्रसक्तमित्याकाङ्क्षायां [4]मनुराह-

दन्तजातेऽनुजाते च कृतचूडे च संस्थिते ।
अशुद्धा बान्धवाः सर्वे सूतके च तथोच्यते ॥ इति ।

अनुजाते अजातदन्त इत्यर्थः । अत्र बान्धवाः सपिण्डाः । [5]देवलः-

जनने मरणे नित्यमाशौचमनुधावति ।
सपिण्डान् मातृबन्धूंश्च यत्र क्वचन तिष्ठतः ॥
अशौचं द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा ॥ इति ।

तत्र आभ्यन्तरमुपलक्षणम् । बाह्यमपि द्विविधम्, द्रव्याशौचं कर्मानधिकारलक्षणं शारीरञ्च । तत्र नियतकालाशौचविधाने तन्नियमार्थमङ्गत्वादादौ चतुर्णां [6]वर्णानां क्रमेण जननाशौचस्यापगमलक्षणां शुद्धिं पूर्वार्द्धेन निरूपयति विप्रक्षत्रिययोरिति । निगदव्याख्यानमेतत् । जननमरणयोरशौचमित्यधिकारे मनुयाज्ञवल्क्यौ[7]क्रमेण-

शुद्ध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः ।

४- मनुस्मृतौ (५/५८) । हारलतायां (पृ-१) तु ''दन्तजाते'' स्थाने ''जातदन्ते'' इति पाठः ।

५- मुद्रितदेवलस्मृतौ वचनमिदं नोपलभ्यते । कृत्यकल्पतरौ शुद्धिकाण्डे (पृ-३) तु ''तिष्ठति'' स्थाने ''गच्छतः'' इति पाठः । हारलतायां (पृ-२) च प्रथमे 'अशौचं' स्थाने ''आशुच्यम्'' इति पाठः । उभयत्र प्रथमपद्यमात्रमुद्धृतम्। कालसारे (पृपृ- २५४-२५५) तु धृतसम्पूर्णवचने ''तिष्ठतः'' स्थाने ''गच्छति'' इति पाठः ।

६- ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चेति चत्वारो वर्णा भवन्ति ।

७- मनुस्मृतौ (५/८३), याज्ञवल्क्यस्मृतौ (३/२२) ।

वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति ॥ इति ।

[अ]क्षत्रस्य द्वादशाहानि विशः पञ्चदशैव तु ।

त्रिंशद्दिनानि शूद्रस्य तदर्द्धं न्यायवर्त्तिनः ॥ इति ।

यद्यपि नानाविधदिवससङ्ख्याप्रतिपादकानि वाक्यानि श्रूयन्ते तथापि मनुयाज्ञवल्क्यप्रतिपादित एव सङ्ख्यानियमः सर्वसाधारणो ग्राह्यः । तथा च सति–

[८]''शावमाशौचं दशरात्रमनृत्विग्दीक्षितब्रह्मचारिणां सपिण्डानाम् । एकादशरात्रं क्षत्रियस्य । द्वादशरात्रं वैश्यस्य । अर्द्धमासमेके । मासं शूद्रस्य ।''

तथा च–

[९]शूद्रस्य त्रिंशता शुद्धिर्विंशत्या दिवसैर्विशः ।

राज्ञः पञ्चदशाहेन दशभिर्ब्राह्मणस्य च ॥ इति ।

इत्यादिन्यूनाधिकसङ्ख्याप्रतिपादकवाक्यानां गौतमदेवलस्मृत्यन्तराणां सगुणनिर्गुणभावेन व्यवस्था कार्या । मनुः[१०]–

सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते ।

समानोदकभावश्च जन्मनाम्नोरवेदने ॥ इति ।

मात्स्ये[११]–लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।

पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम् ॥ इति ।

पुत्रीमज्जनत इति । सुमन्तुः[१२]–

८- गौतमधर्मसूत्रे (२/५/१-५) ।

९- कृत्यक० शुद्धिकाण्डे (पृ-१२), हारलतायां (पृ-९) च देवलवचनमेतत् । मुद्रितदेवलस्मृतौ तु वचनमिदं नोपलभ्यते ।

१०- मनुस्मृतौ (५/६०) ।

११- मत्स्यपुराणे (१८/२९) ।

१२- प्रथमपद्यं कृत्यकल्पतरौ शुद्धिकाण्डे (पृ-१५) हारलतायां (पृ- १८) च अङ्गिरोवचनम् । याज्ञवल्क्यमिताक्षरा (३/१९) धृतेऽङ्गिरोवचनेऽस्मिन् ''संस्पर्शो न निषिध्यते'' इति द्वितीयपादपाठः । द्वितीयपद्यं कृत्यक० शुद्धिकाण्डे (पृ- २०) ब्रह्मपुराणीयम् । हारलतायां (पृ- १८) तु आदिपुराणीयमेतत् ।

अ- ब्राह्मणस्तु दशाहात्तु भवति प्रेतसूतकी ।

इति ग-मातृकायामत्र याज्ञवल्क्यवचनेऽधिकपाठः ।

सूतके सूतिकावर्जं संस्पर्शस्तु न दुष्यति ।
संस्पर्शे सूतिकायास्तु स्नानमेव विधीयते ॥
सूतके तु मुखं दृष्ट्वा जातस्य जनकस्ततः ।
कृत्वा सचेलस्नानं तु शुद्धो भवति तत्क्षणात् ॥ इति ।

[अ]मनुः[१३]– निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च ।
सवासा जलमाप्लुत्य सद्य एव विशुद्ध्यति ॥ इति ।

संवर्तः[१४]– जाते पुत्रे पितुः स्नानं सचेलं तु विधीयते ॥ इति ।
अतः श्रुत्वा पितुः स्नानमिति ।

अथ सर्वजननी स्पर्शे दशाहाच्छुचिरिति । सर्वस्य पुंस्त्रीनपुंसकस्य जननी सर्वा ब्रह्मक्षत्रविट्शूद्ररूपा चासौ जननी चेति आवृत्तिव्याख्या मन्तव्या । बृहत्प्रचेताः[१५]–

सूतिका सर्ववर्णानां दशाहेन विशुद्ध्यति ।
ऋतौ च न पृथक्शौचं सर्ववर्णेष्वयं विधिः ॥ इति ।

कर्मार्हा द्विदशाहतः पुरुषसूर्मासात्परं स्त्रीप्रसूरिति । पैठीनसिः[१६]–

१३- मुद्रितमनुस्मृतौ(५/७७) तु'शुद्धो भवति मानवः'' इति चतुर्थचरणपाठः ।
१४- मुद्रितसंवर्तस्मृतौ (पद्यम्-४२) अपरार्द्धपाठो यथा–
माता शुद्ध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः । इति ।
१५- कृत्यक० शुद्धिकाण्डे (पृ- २०) प्रथमार्द्धमात्रपाठः । हारलतायां (पृ- २०) तु सम्पूर्णं प्रचेतोवचनमेतत् । स्मृतिचन्द्रिकायाम् आशौचकाण्डे (पृ-५) च प्रचेतोवचनेऽस्मिन् ''ऋतौ तु न पृथक् स्त्रीणाम्'' इति धृतपाठः । स्मृतिचन्द्रिकाकारो देवणभट्टोऽत्र (पृ- ६) ''सर्वशब्दः शूद्रेतरवर्णेषु सङ्कोचनीयः। तथा च पारस्करः–
द्विजातेः सूतिका या स्यात् सा दशाहेन शुद्ध्यति ।
त्रयोदशेऽह्नि सम्प्राप्ते शूद्रा शुद्ध्यत्यसंशयः ॥
इति यत्प्रतिपादयति तत् अस्मदुत्कलेषु नाचर्यते । अस्मद्देशे तु–
सर्वेषामेव वर्णानां सूतके मृतके तथा ।
दशाहाच्छुद्धिरेतेषामिति शातातपोऽब्रवीत् ॥
इति अङ्गिरोवाक्यात् सर्वेषां वर्णानामनुलोमसङ्कराणां च दशाहाशौचसमाचारः ।
१६- कृत्यक० शुद्धिकाण्डे(पृ-२०) हारलतायां(पृ-२०) च । याज्ञवल्क्य-मिताक्षरायां (३/१९) तु ''स्नाता सर्व''पाठो नास्ति ।

अ- मनुवचनमिदं नास्ति क-ग-घ-मातृकासु ।

तद्वत्सर्वसपिण्डिनां च कुलजे शुद्धिर्मृतेऽथाचतुः-

पञ्चाश्वाहदशाहिकास्थिचयनात् खण्डे तृतीयांशकम् ।

अङ्गाशौचमथो मृताहगणना साग्नेस्तु दाहात्परं

सर्वे वा दशरात्रतोऽपि शुचयस्तत्सङ्कराः शूद्रवत् ॥ ३ ॥

सूतिकां पुत्रवतीं विंशतिरात्रेण स्नातां सर्वकर्माणि कारयेत्, मासेन स्त्रीजननीम् । इति ।

अत्र यद्यप्येकैकस्मिन्नर्थे बहूनि वाक्यानि सन्ति तथापि स्वविरचित-सङ्ग्रहपदानां संवादार्थं कियन्ति लिखितानि ग्रन्थगौरवभयात् कियन्ति च न लिखितानि[अ] इति मन्तव्यम् ॥ २ ॥

चतुर्णां वर्णानां जननाशौचकालनियमो मृतकाशौचेऽप्यतिदिशति-तद्वत्सर्वसपिण्डिनां च कुलजे शुद्धिर्मृत इति । तथा च यमः[१७]–

सूतके मृतके विप्रो दशरात्रेण शुद्ध्यति ।

जाबालिः[१८]–

उभयत्र दशाहानि सपिण्डिनामशौचकम् । इत्यादि ।

अथाचतुःपञ्चाश्वाहदशाहिकास्थिचयनादिति । आङः प्रत्येकमभि-सम्बन्धः । अश्वशब्दो ज्योतिःशास्त्रादौ सप्तमपर्यायः । अतः सप्तस्थाने अश्व-शब्दप्रयोगः । तेन विप्रादीनां चतुर्थपञ्चमसप्तमदशमदिनभवास्थिचयन-पर्यन्तमङ्गाशौचम् । तदूर्ध्वमङ्गस्पर्शो न दुष्यतीत्यर्थः । तथा च संवर्तः[१९]-

चतुर्थेऽहनि कर्त्तव्यमस्थिसञ्चयनं बुधैः ।

१७- मुद्रितयमस्मृतौ नोपलभ्यते । कृत्यकल्पतरौ शुद्धिकाण्डे (पृ- १३) सम्पूर्णं यमवचनं यथा–

मृतके सूतके विप्रो दशरात्रेण शुद्ध्यति ।
वैश्यो विंशतिरात्रेण त्रिपञ्चाहेन भूमिपः ॥
तथा शूद्रः समग्रेण नित्यं मासेन शुद्ध्यति ।
शुद्धिरेषा मया दृष्टा चातुर्वर्ण्ये समासतः ॥ इति ।

१८- कृत्यकल्पतरौ शुद्धिकाण्डे (पृ- २५) उत्तरार्द्धपाठो यथा–

स्नानोपस्पर्शनाभ्यासादग्निहोत्रार्थमर्हति । इति ।

हारलतायां (पृ- २५) तु जाबालवचनमेतत् ।

१९- मुद्रितसंवर्तस्मृतौ (पद्ये ३८, ३९) 'बुधैः' स्थाने 'द्विजैः' पाठः ।

अ- कियन्ति च क्षेपितानि- इति घ-मातृकायां पाठान्तरम् ।

ततः सञ्चयनादूर्ध्वमङ्गस्पर्शो विधीयते ॥ इति ।

अङ्गिराः[२०]–

चतुर्थेऽहनि कर्त्तव्यः संस्पर्शो ब्राह्मणस्य तु ।
पञ्चमेऽहनि संस्पर्शो विज्ञेयः क्षत्रियस्य तु ।
सप्तमेऽहनि वैश्यस्य शूद्रस्य दशमेऽहनि ॥ इति ।

खण्डे तृतीयांशकमङ्गाशौचमिति । पूर्वोक्तं सम्पूर्णाशौचविषयम् । षट्सप्तत्र्यहपक्षिण्यादिखण्डाशौचे सर्वत्र पुनस्तृतीयांशमभिव्याप्याङ्गाशौचम् । यथाऽऽह देवलः[२१]–

अशौचकालाद्विज्ञेयं स्पर्शनं तु त्रिभागतः ।
शूद्रविट्क्षत्रविप्राणां यथाशास्त्रप्रचोदितात् ॥ इति ।

अथो मृताहगणना साग्नेस्तु दाहात्परमिति । अग्निमति मृते कुतश्चित्कारणात् कालातिक्रमे दाहे दाहदिनमारभ्य दशाहादिव्यवस्थया पिण्डादिदानं सञ्चयनादिकं च कर्त्तव्यम् । मासिकं वार्षिकं च मृताह एव । निरग्निकस्य तु उत्क्रमणसमय एव सर्वत्र आदरणीय इति । [२२]आग्नेये–

मरणादेव कर्त्तव्यः संस्कारो यस्य नाग्निभिः ।
दाहादूर्ध्वमशौचं स्याद्यस्य वैतानिको विधिः ॥[अ]

यथा चाङ्गिराः[२३]–

अनग्निमत उत्क्रान्तेः साग्नेः संस्कारकर्मणः ।
शुद्धिः सञ्चयनं दाहान्मृताहस्तु यथातिथि ॥ इति ।

तत्रापि सम्पूर्णाग्निमत एव ।

२०- मुद्रिताङ्गिरसस्मृतौ नास्ति । कृत्यकल्पतरौ शुद्धिकाण्डे (पृ- १४) तु पैठीनसिवचनमेतत् ।

२१- याज्ञवल्क्यमिताक्षरायां (३/१८) हारलतायां (पृ- १४) च । मुद्रित-देवलस्मृतौ तु नोपलभ्यते ।

२२- अग्निपुराणे (१५८/१६) ।

२३- याज्ञवल्क्यमिताक्षरायाम् (३/२०) । मुद्रिताङ्गिरसस्मृतौ तु नास्ति ।

अ- वैतानिक इति वचनात्–

स्मार्त्ताग्नेर्मरणादेव दहनादग्निहोत्रिणाम् ।
इतरेषु च सर्वेषु प्राणस्यान्ता विशुद्ध्यति ॥ इति ।

दशरात्रेण शुद्ध्यति, सर्वेष्वपीति स्मार्त्ताग्निष्वपीत्यर्थः । इति ग-मातृकायामत्र अधिकपाठः ।

यथा स एव[२४]–

एकाग्नेर्मरणादूर्ध्वमशौचं ब्राह्मणस्य तु[अ]।
यस्य तु त्रयमग्नीनां तस्योर्ध्वं दाहकर्मणः ।। इति ।

अनाहिताग्नेर्मरणात्प्रभृति, आहिताग्नेः संस्कारप्रभृति च अशौचं कर्त्तव्यम् । सञ्चयनं तु तयोर्दाहादेवेति विज्ञानेश्वरः[२५] ।

सर्वे वा दशरात्रतोऽपि शुचय इति । सर्वे चत्वारो वर्णाः । देवलः[२६]–

अशौचं दशरात्रं तु सर्वत्राप्यपरे विदुः ।
निधने प्रसवे चैव पश्यन्तः कर्मणः क्षयम् ।। इति ।

उत्कृष्टगुणसम्पन्नक्षत्रियादिविषयमेतत् । हीनानां तु मनूक्तव्यवस्थयैव शुद्धिरिति ।

तत्सङ्कराः शूद्रवत् इति । [आ]प्रातिलोम्येन सर्ववर्णसङ्करजाताः[२७] शूद्रविहितमासाद्यशौचमाचरन्तीत्यर्थः ।

ब्राह्मे[२८]–शौचाशौचं प्रकुर्वीरन् शूद्रवद्वर्णसङ्कराः । इति ।। ३ ।।

२४- मुद्रिताङ्गिरसस्मृतौ नास्ति । शुद्धिसर्वस्वे (पृ-६) जातुकर्ण्यवचनमेतत् ।

२५- अत्र याज्ञवल्क्यमिताक्षरा(३/२०)कारस्य विज्ञानेश्वरस्य वचनं यथा– इदं चाशौचमाहिताग्नेरुपरमे संस्कारदिवसप्रभृति कर्त्तव्यम् । अनाहिताग्नेस्तु मरणदिवसप्रभृति, सञ्चयनं तूभयोरिति संस्कारदिवसप्रभृतीति विवेचनीयम् ।

२६- मुद्रितदेवलस्मृतौ नास्ति । हारलतायां (पृ-९) तु धृतपाठः । तत्र हारलताकारः अनिरुद्धभट्टः– "अत्यन्तोत्कृष्टगुणानां तु स्वकर्मानुष्ठानहानौ मनःपीडामनुभवतां क्षत्रियविट्शूद्राणां दशरात्रमशौचम् ।" इति स्पष्टीकरोति ।

२७- वर्णसङ्करोत्पत्तौ कारणानि मनुना (१०/२४) उक्तानि । तानि यथा–

व्यभिचारेण वर्णानामवेद्यावेदनेन च ।
स्वकर्मणां च त्यागेन जायन्ते वर्णसङ्कराः ।। इति ।

यद्यपि– आनुलोम्येन वर्णानां यज्जन्म स विधिः स्मृतः ।
प्रातिलोम्येन यज्जन्म स ज्ञेयो वर्णसङ्करः ।।

इति नारदस्मृति (१२/१०२) वचनानुसारं केवलं प्रतिलोमजाः वर्णसङ्कराः कथ्यन्ते तथापि आनुलोम्येनाव्यवहितवर्णजातीयासु भार्यासु द्विजातिभिः उत्पादितानां पुत्राणां सवर्णपुत्रकार्यापेक्षया न्यूनत्वात् ते वर्णसङ्करा इव भवन्ति ।

२८- कृत्यक० शुद्धिकाण्डे (पृ-१३) । मुद्रितब्रह्मपुराणे तु नास्ति । हारलतायां

अ- "अशौचं श्राद्धमेव च" इति घ-मातृकायाम् ।

आ- "आनुलोम्येन प्रातिलोम्येन च" इति ग-मातृकायां पाठः ।

सन्ध्यापञ्चमहामखादिविहितं स्मार्त्तं च कर्म त्रिधा
त्याज्यं पैत्र्यमपि द्विधाऽप्यशुचिना प्रेताम्बुपिण्डं विना ।
श्राद्धे मासिकवार्षिके तु निखिलं कुर्यात्तदन्ते पुन-
र्नाशौच्यन्नमृते सगोत्रमितरैर्भोज्यं समास्तद्भुजः ॥ ४ ॥

सूतकमृतकयोः कियत्कर्म कर्त्तव्यं, कियन्न कर्त्तव्यं, केन प्रकारेणेतिविविच्य पद्यद्वयेन कथयति– सन्ध्यापञ्चमहामखादिविहितं स्मार्त्तं च कर्म त्रिधा त्याज्यमिति । नित्यं नैमित्तिकं काम्यमिति त्रिविधं स्मार्त्तं कर्म सूतकमृतकाशुचिना त्याज्यम् । तत्र जाबालिः[२९]–

सन्ध्यां पञ्च महायज्ञान् नैत्यकं स्मृतिकर्म च ।
तन्मध्ये हापयेत्तेषां दशाहान्ते पुनः क्रियाः ॥ इति ।

दशाहग्रहणमत्राशौचकालोपलक्षणम् । मनुः[३०]–

दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्त्तते ॥ इति ।

पैत्र्यमपि द्विधाऽप्यशुचिना प्रेताम्बुपिण्डं विनेति । पैत्र्यस्य श्राद्धादेः पूर्वेणैव निषेधसिद्धावपि कस्यचिदशौचमध्ये पतितस्य पार्वणश्राद्धस्य लोप एव । तन्मध्येऽपि प्रेतमुद्दिश्य दशाहिकपिण्डोदकदानविधिः । कस्यचिन्मासिकसांवत्सरिकश्राद्धस्य उत्कृष्यकरणमिति । पैत्र्यमपीति पृथगुपादानात् अशुचिना द्वैधं पैत्र्यं श्राद्धतर्पणादि न कर्त्तव्यम् । प्रेतोद्देश्येन तूदकपिण्डदानमस्थिसञ्चयनादिकं च यावद्दशाहविहितं तत्कर्त्तव्यमिति भावः । यमशङ्खौ[३१]–

दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म च ।
प्रेतपिण्डक्रियावर्जमाशौचे विनिवर्त्तते ॥ इति ।

(पृ- १२) तु आदिपुराणवचनमेतत् ।

२९- कृत्यक० शुद्धिकाण्डे(पृ-२२) । हारलतायां(पृ-२२) तु जाबालवचनम् ।

३०- मुद्रितमनुस्मृतौ नास्ति । कृत्यकल्पतरौ शुद्धिकाण्डे (पृ-२३) पराशरमाधवे (३/८) च धृतं सम्पूर्णं मनुवचनं यथा–

उभयत्र दशाहानि कुलस्यान्नं न भुज्यते ।
दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्त्तते ॥ इति ।

३१- कृत्यक० शुद्धिकाण्डे (पृ-२२) । हारलतायां (पृ- २६), स्मृतिचन्द्रिकायामाशौचकाण्डे (पृ- १), शुद्धिकौमुद्यां (पृ- ४) च केवलं शङ्खवचनम् । हारलतायां शुद्धिकौमुद्यां च 'अशौचे' स्थाने 'सूतके' पाठः ।

नाडीच्छेदनतः पुरा च वितरेद्गोहेमवस्त्रादिकं

कुर्याज्जातककर्म षष्ठदिवसाद्युक्तं च तस्मिन् शुचिः ।

स्मार्त्ताग्नावकृतादिना जनिमृतेऽप्यन्येन वा हावयेत्

त्रेताकर्म तु सर्वमेव कुलजैरन्यैश्च कुर्यात् स्वयम् ॥ ५ ॥

प्रेतपिण्डक्रियेति दशाहिककृत्योपलक्षणमेतत् ।

श्राद्धे मासिकवार्षिके तु निखिलं कुर्यात्तदन्ते पुनरिति । निखिलमिति चतुर्वर्णोपलक्षणमेतत् । ऋष्यशृङ्गः[३२]–

देये पितॄणां श्राद्धे तु अशौचं जायते यदि ।
अशौचे च व्यतीते वै तेषां श्राद्धं प्रदीयते ॥
शुचिभूतेन कर्त्तव्यं या तिथिः प्रतिपद्यते ।
सा तिथिस्तस्य कर्त्तव्या न त्वन्या वै कदाचन ॥ इति ।

नाशौच्यन्नमृते सगोत्रमितरैर्भोज्यं समास्तद्भुज इति । मनुः[३३]–

उभयत्र दशाहानि कुलस्यान्नं न भुज्यते । इति ।

अशुचिकुलस्यान्नमन्यकुलजैर्न भोक्तव्यमित्यर्थः । यत्तु यमवचनम्[३४]-

सूतके तु कुलस्यान्नमदोषं मनुरब्रवीत् ।

इति तत् स्वकुलविषयम् । सूतकपदमशौचोपलक्षणमिह । एवं मनुयमवचनयोरविरोधः । मनुः[३५]–

यद्यन्नमत्ति तेषां तु दशाहेन विशुद्ध्यति । इति ॥ ४ ॥

नाडीच्छेदनतः पुरा च वितरेदित्यादि । कुमारप्रसवे नाड्यामच्छिन्नायां गोहेमवस्त्रादि वितरेत् । जातकर्म षष्ठदिवसाद्युक्तं च कुर्यात् । तस्मिन् शुचिर्भवति । पूर्वाशौचेन न दुष्यति[अ] । शङ्खलिखितौ[३६]–

३२- हारलतायां (पृ- २७) शुद्धिकौमुद्यां (पृपृ- १४-१५) च 'प्रदीयते' स्थाने 'विधीयते', 'कर्त्तव्यं' स्थाने 'दातव्यम्' इति पाठः ।

३३- याज्ञवल्क्यमिताक्षरायां(३/१७) यमवचनम् । द्रष्टव्या च टिप्पणी-३० ।

३४- याज्ञवल्क्यमिताक्षरायां (३/१७), कृत्यक० शुद्धिकाण्डे (पृ-२४), शुद्धिकौमुद्यां (पृ-२०) च । मुद्रितयमस्मृतौ बृहद्यमस्मृतौ वा नोपलभ्यते ।

३५- अशौच्यन्नभक्षणप्रसङ्गे मनुना(५/१०२) अशौचं निरूपितम् । तद्यथा–

यद्यन्नमत्ति तेषां तु दशाहेन विशुद्ध्यति ।
अनदन्नन्नमह्नैव न चेत्तस्मिन् गृहे वसेत् ॥ इति ॥

३६- कृत्यक० शुद्धिकाण्डे (पृ- २२) । हारलतायां(पृ- २८) तु 'तदहरित्येके

अ- 'कुमार..... दुष्यति ।' इति भागः नास्ति क-ग-मातृकाद्वये ।

कुमारप्रसवे नाड्यामच्छिन्नायां गुडतिलहिरण्यवस्त्रप्रावरणगोधान्य-प्रतिग्रहेष्वदोषः । इति ।

हारीतः[३७]–

प्राङ्नाड्याश्छेदनात् संस्कारपुण्यार्थान् कुर्वन्ति । इति ।

संस्कारो जातकर्मादिः । पुण्यार्था दानविशेषाः । पारस्करः[३८]–

अच्छिन्नायां नाड्यां मेधाजननायुष्ये करोति । इति ।

प्रजापतिः[३९]–

अशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत् ।
कर्त्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुद्ध्यति[अ] ॥ इति ।

पूर्वाशौचे न दुष्यतीत्यर्थः ।

स्मार्त्ताग्नावकृतादिना जनिमृतेऽप्यन्येन वा हावयेदिति । स्मार्त्ताग्नौ सूतकमृतकयोः पक्कान्नादिव्यतिरिक्तकृतद्रव्येण अकृतेन व्रीहियवादिना कृताकृतेन तण्डुलतिलमुद्गादिना असगोत्रेण वा हावयेत् । एतेन स्मार्त्ताग्नौ सायं प्रातर्होममात्रं वैकल्पिकम् । अन्यत्सर्वं निरस्तमेवेति । श्रौतेऽप्येवमेव तेनेत्यादि ।

त्रेताकर्म तु सर्वमेव कुलजैरन्यैश्च कुर्यात् स्वयमिति । यावन्नित्यं सायं प्रातर्होमदर्शपौर्णमासपिण्डपितृयज्ञादि तत्सर्वं स्वयमशक्तौ स्मार्त्ते बहुसाध्येऽपि असंगोत्रैरभावे कर्मलोपप्रसङ्गे स्वकुलजैरपि यथासम्भवं कर्त्तव्यमेवेतिभावः । अत एवकारः कुर्यादेवेत्यवश्यकरणार्थः । पारस्करः[४०]–

गुर्वर्थं कुर्वतः' इति अन्ते अधिकपाठः । मुद्रितशङ्खलिखितस्मृतौ तु नोपलभ्यते।

३७- लघुहारीतस्मृतौ बृहद्धारीतस्मृतौ वा नोपलभ्यते । कृत्यक० शुद्धिकाण्डे (पृ- २१) सम्पूर्णवचनं यथा–

'जाते चैव कुमारे पितॄणामामोदात् पुण्यं तदहः । तस्मात्तिलपूर्णपात्राणि सहिरण्यानि ब्राह्मणानाहूय पितृभ्यः स्वधां कुर्यात् । प्रजापतये च प्राङ्-नाड्याश्छेदात् संस्कारान् पुण्यार्थान् पुरुषस्य कुर्वन्ति । नाड्यां तु छिंन्नाया-माशौचम् ।' इति । हारलतायां(पृ- २८) तु 'पुरुषस्य' 'नाड्यां' च न स्तः ।

३८- पारस्करगृह्यसूत्रे (१/१६/३) 'जातस्य कुमारस्य' इति मूले अधिकपाठः।

३९- याज्ञवल्क्यमिताक्षरायाम् (३/२०) । मुद्रितप्रजापतिस्मृतौ तु नास्ति ।

४०- पारस्करगृह्यसूत्रे (३/१०/३१-३४) ।

अ- पूर्वाशौचं न बाधकम्- इति अत्र घ-मातृकायां चतुर्थपादपाठः ।

न स्वाध्यायमधीयीरन् । नित्यानि विनिवर्त्तेरन् वैतानवर्जम् । शालाग्नौ चैके । अन्य एतानि कुर्युः । इति ।

वैतानवर्जमिति । वितानं त्रेताग्निः, तत्र विहितं कर्म वैतानम्, तद्वर्जम् । शालाग्निः स्मार्त्ताग्निः । तत्कर्म तु असगोत्रा एव कुर्युरिति भावः ।

जाबालिः[४१]–

जन्महानौ वितानस्य कर्मत्यागो न विद्यते ।
शालाग्नौ केवलो होमः कार्य एवान्यगोत्रजैः ॥ इति ।

जन्म च हानिर्मरणं चेति द्वन्द्वे जन्ममरणयोरित्यर्थः । छन्दोगपरिशिष्टे कात्यायनः[४२]–

सूतके कर्मणां त्यागः सन्ध्यादीनां विधीयते ।
होमः श्रौते तु कर्त्तव्यः शुष्कान्नेनाथवा फलैः ॥

शुष्कान्नं जलावसेकव्यतिरिक्तं निष्पन्नं लाजादि ।

अकृतं हावयेत् स्मार्त्ते तदभावे कृताकृतम् ।
हावयेदिति किं तत्स्यादनारम्भविधानतः ॥
कृतमोदनसक्त्वादि तण्डुलादि कृताकृतम् ।
व्रीह्यादि चाकृतं प्रोक्तमिति हव्यं त्रिधा बुधैः ॥
सूतके च प्रवासे च स्वाशक्तौ श्राद्धभोजने ।
एवमादिनिमित्तेषु हावयेद्वेति योजयेत् ॥ इति ।

सूतके चेत्यादिस्मार्त्तविषयमेतत् । अग्निहोत्रविषये यजमानस्य स्नानमात्रेण तात्कालिकी शुद्धिरिति । तथा च सद्यः शौचाधिकारे गौतमः–

[अ]अग्निहोत्रिणामग्निहोत्रविषये ।

मनुः[४३]– न वर्द्धयेदघाहानि प्रत्यूहेन्नग्निषु क्रियाः ।
न च तत्कर्म कुर्वाणः सनाभ्योऽप्यशुचिर्भवेत् ॥ इति ।

४१- कृत्यक० शुद्धिकाण्डे (पृ- २५) स्मृतिच० आशौचकाण्डे (पृ-७७) च । हारलतायां (पृ-२४) मन्वर्थमुक्तावल्यां(मनु० ५/८४) च जाबालवचनम् ।

४२- मुद्रितछन्दोगपरिशिष्टे (३/६०-६३) 'कृतं वा हावयेदन्नम्' इति द्वितीयपद्ये तृतीयपादपाठः ।

४३- मनुस्मृतौ (५/८४) ।

अ- सम्पूर्णाग्निमतोऽशौचे त्रेताहोमो न दुष्यति ।
अशौचान्तरपाते तु सद्यः स्नात्वा पुनर्भवेत् ॥

इति घ-मातृकायामत्राधिकः पाठः ।

एकाहाद्बहुवह्निवेदनिरतः सम्पर्कहीनः शुचि-
त्रेताग्निर्यदि मन्त्रवित् त्रिदिवसैः स्मार्त्तस्तथा वेदवित् ।
सद्वेदोऽपि निरग्निकश्चतुरहात् स्मार्त्त समन्त्रोऽप्यथा-
नग्निर्मन्त्रयुतश्च पञ्चदिवसैः पूर्णे तु सम्पर्किणः ॥ ६ ॥

अशौचसङ्कोचनिमित्ते सति त्र्यहिकादिसम्भवेऽपि आलस्यादिना दशरात्रादि न स्वीकुर्यात् । अशौचमध्येऽपि त्रेताग्निषु नित्यकर्माणि न त्यजेत् । यथा तत्कर्मकुर्वाणो यजमानो नाशुचिर्भवति एवं सनाभ्योऽपि सगोत्रोऽपि सगोत्राभावे कर्मकुर्वाणो नाशुचिर्भवेदिति । जाबालिः-

स्नानोपस्पर्शनाभ्यासादग्निहोत्रार्थमर्हति ।

व्याघ्रपादः[४४]–

श्रौते कर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयात् । इति ।

अर्थादत्र यजमान एव । अङ्गिराः[४५]–

अशौचं यस्य संसर्गाज्जायते गृहमेधिनः ।
क्रियास्तत्र न लुप्यन्ते गृह्याणां न च तद्भवेत् ॥ इति ॥

वैश्वदेवादिक्रियाः अन्येन कारयितव्याः । गृह्याणां पुत्रदारादीनां द्रव्याणां च नाशौचमित्यर्थः ॥ ५ ॥

एवञ्च सर्वेषां सम्पूर्णाशौचप्राप्तौ गुणविशेषतारतम्येन अशौचसङ्कोचम् आह–एकाहाद्बहुवह्निवेदनिरतः सम्पर्कहीनः शुचिरिति । तथा च दक्षः[४६]-

सद्यः शौचं तथैकाहस्त्र्यहश्चतुरहस्तथा ।
षड्दशद्वादशाहाश्च पक्षो मासस्तथैव च ॥
मरणान्तं तथा चान्यद्दश पक्षास्तु सूतके ॥ इति ।

अत्र प्रकरणे वेदशब्दः सम्पूर्णैकवेदशाखापरः । तेन यस्य कस्यचिद्वेदस्य सम्पूर्णशाखाध्यायी श्रौताग्निमान् विप्रो यदि पुत्रदारादिभिः सह समानशयनभोजनादिसम्पर्कहीनः स्यात्तदैकेनैवाहोरात्रेण स्नानतः शुद्धो भवति ।

त्रेताग्निर्यदि मन्त्रवित् त्रिदिवसैरिति । सम्पर्कहीन इति सर्वत्र सम्बध्यते ।

४४- याज्ञवल्क्यमिताक्षरायां (३/१७) पूर्वार्द्धं यथा-
स्मार्त्तकर्मपरित्यागो राहोरन्यत्र सूतके । इति ।

४५- याज्ञवल्क्यमिताक्षरायाम् (३/१७) । मुद्रिताङ्गिरसस्मृतौ तु नास्ति ।

४६- दक्षस्मृतौ (६/२,३) ।

त्रेताग्निमान् अपि यदि मन्त्रमात्राध्यायी स त्रिभिरहोरात्रैः शुद्धो भवति ।

स्मार्त्तस्तथा वेदविदिति । पूर्वं सम्पूर्णाग्निमत्त्वे वेदैकदेशवत्त्वे त्र्यहाशौचं उक्तम् । सम्प्रति तु सम्पूर्णवेदवत्त्वे वह्न्येकदेशस्मार्त्ताग्निमात्रवत्त्वेऽपि त्र्यहमतिदिशति तथेति ।

सद्वेदोऽपि निरग्निकश्चतुरहादिति । सम्पूर्णो वेदो यस्य सः उभयाग्निरहितश्चतुरहाच्छुचिः ।

स्मार्त्तः समन्त्रोऽपीति । तथा अग्न्येकदेशे स्मार्त्तवान्, वेदैकदेशमन्त्र-मात्राध्येताऽपि चतुरहादेव शुचिरिति अपि शब्दार्थः । तथा च दक्षः[४७]–

एकाहाच्छुद्ध्यते विप्रो योऽग्निवेदसमन्वितः ।
हीने हीनतरे चैव त्र्यहश्चतुरहस्तथा ॥ इति ।

पराशरः[४८]–अग्नयो यत्र हूयन्ते वेदो वा यत्र पठ्यते ।
सततं वैश्वदेवश्च नाशौचं मृतसूतके ॥
ब्रह्मचारी गृहे यत्र हूयते च हुताशनः ।
सम्पर्कविनिवृत्तानां न प्रेतं नैव सूतकम् ॥
एकाहाद्ब्राह्मणः शुद्ध्येद्योऽग्निवेदसमन्वितः ।
त्र्यहात्केवलवेदस्तु निर्गुणो दशभिर्दिनैः ॥
सम्पर्काद्दुष्यते विप्रो जनने मरणेऽपि च ।
सम्पर्कविनिवृत्तानां न प्रेतं नैव सूतकम् ॥ इति ।

जाबालिः[४९]–

एकद्वित्रिगुणैर्युक्ताश्चतुस्त्र्येकदिनैः क्रमात् ।
सर्वे वा सर्वयोगेन सद्यःशौचाः प्रकीर्त्तिताः ॥ इति ।

अथानग्निमन्त्रयुतश्च पञ्चदिवसैरिति । उभयाग्निरहितो यदि मन्त्रमात्राध्यायी असम्पृक्तस्तदा पञ्चदिवसैः शुद्धो भवति ।

४७- कृत्यक० शुद्धिकाण्डे (पृ-५) हारलतायां (पृ- ५) च । मुद्रितदक्षस्मृतौ (६/६) तु पद्यस्यास्य उत्तरार्द्धपाठ एवं यथा-

त्र्यहात्केवलवेदस्तु द्विहीनो दशभिर्दिनैः । इति ।

अत्रिसंहितायां (पद्यम्-८३) पराशरस्मृतौ (३/५) च वचनमप्येवम् ।

४८- कृत्यक० शुद्धिकाण्डे (पृ-६) । मुद्रितपराशरस्मृतौ तु प्रथमपद्यं नास्ति। अन्यपद्यत्रयम् (३/२०, ५, २१) उपलभ्यते ।

४९- कृत्यक० शुद्धिकाण्डे (पृ- ७) ।

सर्वामासयुगादृतौ त्रिदिवसैः स्त्री शुद्ध्यति स्नानत-
स्तुर्ये स्पर्शशुचिश्च धर्मविधिकृत् स्यात्पञ्चमे निःस्रवा ।
षण्मासादथ माससङ्ख्यकदिनैः स्रावेऽत्र सद्योऽपरः
सोर्ध्वं जातमृतौ तथा मृतजनौ सूतेरशौचं चरेत् ॥ ७ ॥

पूर्णे तु सम्पर्किण इति । उक्तरूपा अप्येते यदि पुत्रदारादिसंयुक्ता भवन्ति ब्राह्मणब्रुवा वा ये भवन्ति तदेते सर्वे सम्पूर्णाशौचिन एवेत्यर्थः । यथा विशुद्ध्येदित्यनुवृत्तौ बृहस्पतिः[५०]–

पञ्चाहेनाग्निहीनस्तु दशाहाद्ब्राह्मणब्रुवः । इति ।
[५१]गर्भाधानादिसंस्कारैर्युक्तश्च नियमव्रतैः ।
नाध्यापयति नाधीते स ज्ञेयो ब्राह्मणब्रुवः ॥ इति ।

इदञ्च तथातथागुणविशिष्टस्य सम्पर्कहीनस्य एकत्रिचतुःपञ्चाहात्परं शुद्धिविधानं सकलश्रौतस्मार्त्तकर्मविषयमित्यवगन्तव्यम्, न पुनः अग्निहोत्रमात्रविषयम् । तन्मात्रे तु–

अग्निहोत्रिणामग्निहोत्रविषये । इति,
न वर्द्धयेदघाहानि । इति,
स्नानोपस्पर्शनाभ्यासादग्निहोत्रार्थमर्हति । इति,
श्रौते कर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयात् ।

इति गौतममनुजाबालिव्याघ्रपादादिवचनैरेव सम्पृक्ताग्निहोत्रिणः शुद्धिविधानसिद्धेरर्थात् दक्षपराशरजाबालिबृहस्पत्यादिवचसामुक्तवेदाग्निगुणवतः सम्पर्कहीनस्य सकलकर्मविषयाशौचनिवृत्तावेव तात्पर्यमिति युक्तिमुत्पश्यामः । असम्पर्कस्तु प्रायोवृत्त्या बहुकुटुम्बस्य न सम्भवतीति दशाहाशौचसमाचारो दृश्यत इति सर्वमवदातम् ॥ ६ ॥

सम्प्रति चतुर्वर्णस्त्रीणामपि तुल्याशौचतया रजोऽशौचगर्भस्रावाद्य-

५०- कृत्यक० शुद्धिकाण्डे (पृ-४) हारलतायां (पृ- ५) च पूर्वार्द्धं यथा-
त्रिरात्रेण विशुद्ध्येत्तु विप्रो वेदाग्निसंयुतः । इति ।
मुद्रितबृहस्पतिस्मृतौ तु वचनमिदं नोपलब्धम् ।
५१- हारलतायाम् (पृ-६) अङ्गिरोवचनमेतत् । मुद्रिताङ्गिरसस्मृतौ तु नास्ति। वेदव्यासस्मृतौ (४/४४) अप्येवं पाठः, यथा-
गर्भाधानादिभिर्मन्त्रैर्वेदोपनयनेन च ।
नाध्यापयति नाधीते स भवेद्ब्राह्मणब्रुवः ॥ इति ।

शौचशुद्धिं विविच्य पद्यद्वयेन कथयति—सर्वामासयुगादृतौ त्रिदिवसैः स्त्री शुद्ध्यति स्नानत इति । सर्वा सर्ववर्णा स्त्री । आमासयुगात् मासद्वयमभिव्याप्य ऋतौ रजसि जाते त्रिभिरहोरात्रैर्गतैः स्नाता शुद्ध्यति । तथा च वशिष्ठः[५२]—

त्रिरात्रं रजस्वलाऽशुचिर्भवति । इति ।

मनुः[५३]—

ऋतौ च न पृथक्शौचं सर्ववर्णेष्वयं विधिः । इति ।

स्तुर्ये स्पर्शशुचिश्च धर्मविधिकृत् स्यात्पञ्चमे निःस्रवेति । चतुर्थदिवसे रजस्वला स्नाता सती स्पर्शविषये शुचिर्भवति । तत्र चतुर्थदिवसे स्पृश्यापि धर्माधिकारिणी पञ्चमदिवस एव भवति, निःस्रवा रजःस्रावरहिता चेत् । तथा च शङ्खः[५४]—

शुद्धा भर्त्तुश्चतुर्थेऽह्नि न शुद्धा दैवपित्र्ययोः ।

५२- वशिष्ठधर्मशास्त्रे (५/६) ।

५३- कालसारे (पृपृ- २९१-२९२) । मुद्रितमनुस्मृतौ तु नोपलभ्यते । द्रष्टव्या च टिप्पणी- १५ ।

५४- हारलतायाम्(पृ- ७०) । मुद्रितशङ्खस्मृतौ(१६/१७) शुद्धिमयूखे (पृ-२६)च 'स्नानेन स्त्री रजस्वला' इति द्वितीयपादपाठः । अत्र याज्ञवल्क्यमिताक्षरा-(३/२०) कारेण विज्ञानेश्वरेण साधु स्फुटीकृतम् । तद्यथा—'पञ्चमेऽहनि' इति रजोनिवृत्तिकालोपलक्षणार्थम् । यदा रजोदर्शनादारभ्य पुनः सप्तदश-दिनाभ्यन्तरे रजोदर्शनं तदा अशुचित्वं नास्त्येव ; अष्टादशे त्वेकाहाच्छुद्धिः, एकोनविंशे द्व्यहात्, तत उत्तरेषु त्र्यहाच्छुद्धिः । यथाऽऽहात्रिः—

रजस्वला यदि स्नाता पुनरेव रजस्वला ।
अष्टादशदिनादर्वागशुचित्वं न विद्यते ॥
एकोनविंशतेरर्वागेकाहं स्यात्ततो द्व्यहम् ।
विंशत्प्रभृत्युत्तरेषु त्रिरात्रमशुचिर्भवेत् ॥ इति ।

यत्तु— चतुर्दशदिनादर्वागशुचित्वं न विद्यते ।

इति स्मृत्यन्तरं, तत्र स्नानप्रभृतित्वमभिप्रेतमतो न विरोधः । अयं चाशुचित्वप्रतिषेधो यस्या विंशतिदिनोत्तरकालमेव प्रायशो रजोदर्शनं तद्विषयः । यस्याः पुनरारूढयौवनायाः प्रागेवाष्टादशदिनात्प्राचुर्येण रजोनिर्गमस्तस्याः त्रिरात्रमेवाशौचम् । तया च यावत्त्रिरात्रंस्नानादिरहितया स्थातव्यम् ; 'रजस्वला त्रिरात्रमशुचिर्भवति..' इति वशिष्ठस्मरणात् । इति ।

दैवे कर्मणि पित्र्ये च पञ्चमेऽहनि शुद्ध्यति ।। इति ।

भर्त्तुरपि पादसंवाहनादिव्यापार एव शुद्धा, नाभिगमने, चतुर्थेऽहनि तन्निषेधात्।

"तासामाद्याश्चतस्रस्तु निन्दितैकादशी च या ।

त्रयोदशी च शेषास्तु प्रशस्ता दशरात्रयः ।।[अ] इति ।

प्रथमे रजसि निषेकार्थमेके[आ]।

"रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला । इति ।

साध्वी दैवपित्र्यकर्मयोग्येत्यर्थः । जाबालिः[५७]–

रात्रावेव समुत्पन्ने मृते रजसि सूतके ।

पूर्वमेव दिनं ग्राह्यं यावन्नाभ्युदितो रविः ।। इति ।

आब्दिकश्राद्धकाले यदि रजस्वला भवति तदा पञ्चमेऽहनि तच्छ्राद्धं कर्त्तव्यम् ।

५५- मनुस्मृतौ (३/४७) । रजस्वलाभिगमनविचारः आपस्तम्बस्मृतौ (७/१) प्रदर्शितो यथा–

स्नानं रजस्वलायास्तु चतुर्थेऽहनि शस्यते ।

वृत्ते रजसि गम्या स्त्री नानिवृत्ते कथञ्चन ।। इति ।

ऋतुकालाभिगमने गर्भशङ्काहेतोर्मैथुनिनः पुरुषस्यापि स्नानेन शुद्धिर्भवति । तदुक्तं यमस्मृतौ (पद्यम्-१६) यथा–

ऋतौ तु गर्भं शङ्कित्वा स्नानं मैथुनिनः स्मृतम् ।

अनृतौ तु स्त्रियं गत्वा शौचं मूत्रपुरीषवत् ।। इति ।

५६- मनुस्मृतौ (५/६६) पूर्वार्द्धवचनं यथा–

रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुद्ध्यति । इति

५७- शुद्धिमयूखे (पृ-२६), शुद्धिकौमुद्यां (पृ-६), कालसारे (पृ-३०८) च कश्यपवचनमेतत्। याज्ञवल्क्यमिताक्षरायां(३/२०) कश्यपवचने पूर्वपाठो यथा-

उदिते तु यदा सूर्ये नारीणां दृश्यते रजः ।

जननं वा विपत्तिर्वा यस्याहस्तस्य शर्वरी ।।

अर्द्धरात्रावधिः कालः सूतकादौ विधीयते ।

रात्रिं कुर्यात् त्रिभागां तु द्वौ भागौ पूर्व एव तु ।।

उत्तरांशः प्रभातेन युज्यते ऋतुसूतके ।। इति ।

अ- पद्यमिदं नास्ति क-ग-घ-मातृकासु ।

आ- वाक्यमिदं नास्ति क-ग-मातृकाद्वये ।

अपुत्रिणी च या भार्या सम्प्राप्ते भर्त्तुराब्दिके ।
रजस्वला भवेत् सा तु कुर्यात् तत्पञ्चमेऽहनि ।। इति ।

षण्मासादथ माससङ्ख्यकदिनैः स्राव इति । तृतीयमासादि षण्मासपर्यन्तं कालमभिव्याप्य यावत्सङ्ख्यमासे स्रावो भवति तावत्सङ्ख्याहोरात्रैः एव स्नाता सती स्त्री शुद्ध्यतीति भावः । जाबालः[५८]–

रात्रयो मासतुल्याः स्युर्जनन्या गर्भविस्रवे ।

जनन्या एव न तु जनकस्य इत्यर्थः । तृतीयचतुर्थमासगर्भस्रावे पितुः स्नानमात्रमेव । वृद्धवशिष्ठः[अ]–

गर्भस्रावे पितुः स्नानमात्रम्, त्रिचतुर्मास एव । इति ।

अत्र सद्योपर इति । अत्र गर्भस्रावे अपरः सपिण्डः सद्यः शुद्ध्यति । सुमन्तुः[५९]–

गर्भमासतुल्या दिवसा गर्भस्रावे । सद्यः शौचं वा । इति ।

वा-शब्दो व्यवस्थावाची । तेन सपिण्डविषयमेतत् ।

सोर्ध्वं जातमृतौ तथा मृतजनौ सूतेरशौचं चरेदिति । षण्मासोपरि सप्तमे अष्टमे च मासे अपप्रसवकाले यथाकथञ्चित्प्रसवे सा स्त्री सम्पूर्णमेव स्वजात्युक्तं सूतकाशौचं कुर्यादित्यर्थः । ब्राह्मे[६०]–

षण्मासाभ्यन्तरं यावद्गर्भस्रावो भवेद्यदि ।
तदा माससमैस्तासां दिवसैः शुद्धिरिष्यते ।।
अत ऊर्ध्वं स्वजात्युक्तमशौचं तासु विद्यते ।

५८- कृत्यक० शुद्धिकाण्डे(पृ-४५) । हारलतायां (पृ- ६८)'निःस्रवे-पाठः' ।

५९- कृत्यक० शुद्धिकाण्डे (पृ- ४५), हारलतायां (पृ-६८), स्मृतिचन्द्रिकायामाशौचकाण्डे (पृ-३), मन्वर्थमुक्तावल्यां(मनु० ५/६६) च ।

६०- प्रथमपद्यद्वयं ब्रह्मपुराणीयमिति वीरमित्रोदये (३/२१), कूर्मपुराणीयमिति कृत्यक० शुद्धिकाण्डे(पृ- ४५) । आदिपुराणीयमिति हारलतायां (पृ- ७१), शुद्धिकौमुद्यां (पृ-४३) च । मुद्रितब्रह्मपुराणे तु नास्ति । हारलतायां (पृ- ७३), स्मृतिच० आशौचकाण्डे (पृ-५) च परवर्त्ति आदिपुराणीयवचनं यथा–

अजातदन्तो मासैर्वा मृतः षड्भिर्गतैर्बहिः ।।
वस्त्राद्यैर्भूषितं कृत्वा निक्षिपेत्तं तु काष्ठवत् ।
खनित्वा शनकैर्भूमौ सद्यःशौचं विधीयते ।। इति ।

अ- वाक्यमिदं नास्ति क-ग-मातृकाद्वये ।

तत्सप्ताष्टममासयोरुभयथा गर्भच्युतौ सद्गुणे
ज्ञातौ वा विगुणे यथेष्टचरिते सद्योऽहरेकं त्र्यहम् ।
त्रीण्येवात्र पितुः परं मृतजनौ सर्वस्य पूर्णं भवे-
दन्तःसूतिमृते पितुश्च जननाशौचं द्वयं नान्यतः ॥ ८ ॥

सद्यःशौचं सपिण्डानां गर्भस्य पतने सति ॥
स्त्रीणां तु पतितो गर्भः सद्यो जातो मृतोऽथवा ॥

अत्र तासामिति बहुवचनं चतुर्वर्णाभिप्रायम् । स्वजात्युक्तमतः परम् अशौचम् । इति ॥ ७ ॥

पूर्वं चतुर्वर्णसाधारणं सूतिकाया रजःप्रभृतिदशमासमध्ये स्रावापप्रसवेषु दशाहमध्ये जातमृतौ मृतजनौ च तत्पत्यादिसपिण्डानां षण्मासपर्यन्तम् अशौचशुद्धिरुक्ता । सम्प्रति सप्तमाष्टममासयोः अपप्रसवकाले जातमृतौ मृतजनौ च नवममासादिकाले मृतजनौ तथा च दशममासमध्ये जातमृतावपि पितुस्तत्सपिण्डानां च अशौचशुद्धिं निरूपयति—तत्सप्ताष्टममासयोरुभयथा गर्भच्युतौ सद्गुणे ज्ञातौ वा विगुणे यथेष्टचरिते सद्योऽहरेकं त्र्यहमिति । तदित्यशौचपरामर्शः । उभयथेति जातमृतौ मृतजनौ वा । स्पष्टार्थमितरत् ।

तत्र हारीतः[६१]—

गर्भपतने त्रिरात्रं स्त्रीणां साधीयो रजोविशेषत्वात् । जातमृते मृतजाते वा कुलस्य । इति ।

शङ्खलिखितौ[६२]—

स्रंसने गर्भस्य त्र्यहं वा ।

सुमन्तुः—

गर्भमासतुल्या दिवसा गर्भस्रावे । सद्यःशौचं वा ।

इति स्मृतिवाक्यानामव्यवस्थितविषयतया सन्देहापादकत्वेऽपि ब्राह्मकौर्म-वाक्यदर्शनात् व्यवस्थाऽवगन्तव्या । 'षण्मासाभ्यन्तरं यावदि'त्यादि तु ब्रह्मपुराणवाक्यं पूर्वश्लोकव्याख्यानलिखितमनुसन्धेयम् ।

६१- कृत्यकल्पतरौ शुद्धिकाण्डे(पृ-४४) 'दशाहादि कुलस्य' इति पाठः । मुद्रितहारीतस्मृतौ तु नास्ति ।

६२- कृत्यक० शुद्धिकाण्डे (पृ-४४) सम्पूर्णं शङ्खलिखितवचनं यथा—

गर्भमाससमा रात्री स्रंसने गर्भस्य । त्र्यहं वा । सर्वेषां सकुलानाम् । इति । मुद्रितशङ्खलिखितस्मृतौ तु नोपलभ्यते ।

पित्रोः प्राग्रदनादहर्व्रतविधेर्बाले मृते च त्र्यहं
ज्ञातेश्चाद्विजचौडकोपनयनात् सद्यो निशा त्रिक्षपाः ।
ऊर्ध्वं पूर्णमधोरदादिषु च तत्कालेऽप्यशौचं समं
खातेनाद्विसमे जलादिदहने क्षेपे त्र्यहोऽम्भोऽनले ॥ ९ ॥

दर्शयितुं पुनः पृथङ्निषेध इति । कौर्मे[६८]–
जातमात्रस्य बालस्य यदि स्यान्मरणं पितुः ।
मातुश्च सूतकं तत्स्यात् पिता त्वस्पृश्य एव च ॥
सद्यः शौचं सपिण्डानां कर्त्तव्यं सोदरस्य च ॥ इति ।

अत्र सूतकावसानपर्यन्तं पित्रोरङ्गाशौचं 'पिता त्वस्पृश्य एव च' इत्यतोऽवगम्यते । मातुश्च पूर्वं प्रतिपादितमेवेति सप्तमाष्टममासिकगर्भस्रावे अशौचनिर्णयः ॥ ८ ॥

पूर्वं दशाहपर्यन्तं मृतजातजातमृतविषयाशौचमुक्तम् । सम्प्रति दशाहाद्बहिर्बालबालिकामृतिविषयाशौचं पद्यद्वयेनाह-- पित्रोः प्राग्रदनादहर्व्रतविधेर्बाले मृते च त्र्यहमिति । दन्तजननात्प्राक्काले बाले मृते पित्रोरहोरात्रम् । सप्तममासप्रभृतिगर्भाष्टमवर्षकालात् पूर्वं मासद्वयाधिक-षड्वर्षमध्ये बालमृतौ पित्रोस्त्र्यहमित्यर्थः । अत्र पारस्करः[६९]–

अद्विवर्षे प्रेते पित्रोराशौचम् । एकरात्रं त्रिरात्रं वा । शरीरमदग्ध्वा निखनन्ति । इति ।

अत्र अजातदन्त एकरात्रं,जातदन्ते त्रिरात्रमिति व्यवस्थावाची वा-शब्दः । सगुणयोरेकरात्रम्, निर्गुणयोस्त्रिरात्रमिति वा व्यवस्थायां वा-शब्दः । तथा च कौर्मे[७०]–

अजातदन्तमरणे पित्रोरेकाहमिष्यते ।

६८- कूर्मपुराणे उत्तरार्द्धे (२३/१४-१५) । तत्र ततः परम् (२३/१५-१७)-
ऊर्ध्वं दशाहादेकाहं सोदरो यदि निर्गुणः ॥
अथोर्ध्वं दन्तजननात् सपिण्डानामशौचकम् ।
एकाहं निर्गुणानां तु चौडादूर्ध्वं त्रिरात्रकम् ॥
अदन्तजातमरणं सम्भवेद्यदि सत्तमाः ।
एकरात्रं सपिण्डानां यदि तेऽत्यन्तनिर्गुणाः ॥ इति ।

६९- पारस्करगृह्यसूत्रे (३/१०/२,४,५) ।

७०- कूर्मपुराणे उत्तरार्द्धे (२३/१२) ।

जातदन्ते त्रिरात्रं स्याद्यदि स्यातां तु निर्गुणौ ॥ इति ।

सगुणयोस्त्वेकाहमिति अभिप्रायः । यमः[७१]–

अजातदन्ततनये प्रेतेऽहोरात्रमिष्यते ।

अत्र अद्विवर्षे अजातदन्तजातदन्तरूपकालविशेषोपादानात् एतत्काले पित्रोरेकाहत्र्यहावेव । यानि तु–

[७२]गर्भस्थे प्रेते मातुर्दशाहम् । जात उभयोरिति । इति ।

तथा च– [७३]'बाले मृते सपिण्डानां सद्यः शौचं विधीयते ।

दशाहेनैव दम्पत्योः..... ।'

इत्यादिदशाहप्रतिपादकपैङ्ग्यव्याघ्रपादवाक्यानि तानि "बालस्त्वन्तर्दशाहे त्वि"ति, तथा "जातमात्रस्य बालस्ये"ति तथा पित्रोरधिकारे–

अन्तःसूतके चेदुत्थानादाशौचं सूतकवत् ।

इति शङ्खकौर्मपारस्करवचनसमानविषयतया अन्तर्दशाहबालमृतिविषयाणीति युक्तिमुत्पश्यामः । अत्र पित्रोरित्युपादानात् "आदन्तजन्मनः" इति वचनसामर्थ्यात् ज्ञातिविषयमेवेति ।

ज्ञातेश्चाद्विजचौडकोपनयनात् सद्यो निशा त्रिक्षपा इति । आङः प्रत्येकमभिसम्बन्धः । द्विजाः दन्ताः । याज्ञवल्क्यः[७४]–

आदन्तजन्मनः सद्य आचूडान्नैशिकी स्मृता ।

७१- मुद्रितयमस्मृतौ बृहद्यमस्मृतौ वा नास्ति । किन्तु याज्ञवल्क्यमिताक्षरायां (३/२३) निर्णयसिन्धौ (पृ- ३६५) च सम्पूर्णं यमवचनं यथा–

अदन्तजाते तनये शिशौ गर्भच्युते तथा ।
सपिण्डानां तु सर्वेषामहोरात्रमशौचकम् ॥ इति ।

स्मृतिचन्द्रिकायामाशौचकाण्डे (पृ- २७) तु यमवचनं यथा–

ऊनद्विवर्षके बाले प्रेतत्वमुपगच्छति ।
अजातदन्ते तनये शिशौ गर्भच्युते तथा ॥
निर्वृत्तचूडके वाऽपि देशान्तरमथो गते ।
सपिण्डानां तु सर्वेषामहोरात्रमशौचकम् ॥ इति ।

७२- याज्ञवल्क्यमिताक्षरायां (३/१८) स्मृतिचन्द्रिकायामाशौचकाण्डे (पृ-१४) च पैङ्ग्यवचने "कृते नास्ति सौदराणां च" इति अन्ते अधिकपाठः ।

७३- पराशरमाधवे (३/१०) "सोदराणां तथैव च" इति चतुर्थपादपाठः । स्मृतिचन्द्रिकायामाशौचकाण्डे(पृ-१४) तु 'जाते मृते' इति आदौ पाठः ।

७४- याज्ञवल्क्यस्मृतौ (३/२३) ।

त्रिरात्रमाव्रतादेशाद्दशरात्रमतःपरम् ॥ इति ।

त्रिरात्रमाव्रतादेशादिति द्विमासाधिकषड्वर्षमध्ये बालबालामृतौ गर्भाष्टमाब्दादिकालात्पूर्वं त्रिरात्रम्, षड्वर्षत्रिमासादिकाले अनुपनीतमृतौ तु सम्पूर्णमेव स्वजात्युक्ताशौचमित्यत्र युक्तिरुक्तिश्च । द्वैजं द्वित्रिगुणमित्यत्र गर्भाष्टमादिपदं व्याख्यानावसरे वक्ष्यत इत्यर्थः ।

ऊर्ध्वं पूर्णमिति । उपनयनादूर्ध्वं मृते त्रैवर्णिकपित्रादिसर्वसपिण्डानामशौचसङ्कोचनिषेधयोरभावादौत्सर्गिकदशरात्राद्यशौचमेवेति भावः ।

अधोरदादिषु च तत्कालेऽप्यशौचं सममिति । रदचूडोपनयनेषु स्वकालात्पूर्वं रदोत्पत्तौ तथा चूडाकालात् तृतीयाब्दात् पूर्वं प्रथमाब्दे चूडाकरणे तथा गर्भाष्टमवर्षादुपनयनकालात्पूर्वं शाखान्तरोक्तपञ्चमाब्दे उपनयने तत्र विपत्तौ दन्तजननादिक्रियानिष्पन्ने सति दन्तजननाद्युक्ताशौचमिति । तथा रदादिकाले कुतश्चित् कारणात् रदचूडोपनयनासम्भवेऽपि दन्तजननादीनां कालोपलक्षणत्वात् तत्तत्कालमध्ये विपत्तौ पित्रादिसर्वसपिण्डानां यथोक्तं तत्तद्दन्तजननादिविहितमेवाशौचमितिभावः । उभयत्र युक्तिरुच्यते । तथाहि–

व्रतचूडाद्विजानां तु प्रतीतिषु यथाक्रमम् ।
दशाह-त्र्यह-एकाहैः शुद्ध्यन्त्यपि च निर्गुणाः ॥

इति [75]जाबालवचने प्रतीतिपदोपादानादेषां स्वकालात्पूर्वमकालेऽपि प्रतीतो एतदुक्ताशौचमिति गम्यते । अन्यथा व्रतचौडद्विजेष्वितिसिद्धे प्रतिपदमनर्थकमेव स्यादितिभावः । एवं त्र्यहाशौचाधिकारे–

द्विजन्मनामयं कालस्त्रयाणां च षडाब्दिकः ।
पञ्चाब्दिकस्तु शूद्राणां स्वजात्युक्तमतः परम् ॥

इति [76]ब्रह्मपुराणवाक्ये द्विमासाधिकषड्वर्षमध्ये त्र्यहाशौचनियमात् । तदुपरि गर्भाष्टमप्रवेशप्रभृतिकाले स्वजात्युक्तमतः परमिति सम्पूर्णाशौचं

७५- कृत्यक० शुद्धिकाण्डे (पृ-३६) हारलतायां (पृ- ३७) च । शुद्धितत्त्वे (स्मृतितत्त्वे द्वितीयभागे, पृ-२७१) तु जाबालिवचनमेतत् ।

७६- मुद्रितब्रह्मपुराणे नोपलभ्यते । कृत्यक० शुद्धिकाण्डे (पृपृ- ३८-३९) धृतब्रह्मपुराणवचनेऽस्मिन् पूर्वपाठो यथा–

अनतीतद्विवर्षं तु मृतं भूमौ निधापयेत् ।
त्रिरात्रं बान्धवानां च तस्याशौचं च सर्वशः ॥

विदधता यस्याष्टमे नवमे वा उपनयनं भविष्यति तस्य सप्तमे विपत्तावपि सम्पूर्णाशौचमनुमतं भवति । तथा सति उपनयनस्य स्वकालोपलक्षकत्वे तत्संन्नियोगविशिष्टयोरपि द्विजचौडयोः स्वस्वकालोपलक्षकत्वमवगम्यते। तस्मात् त्र्यहाशौचकालात्परं गर्भाष्टमवर्षकालेऽनुपनीते मृतौ स्वजात्युक्तसम्पूर्णाशौचम् । कुतश्चित्कारणात् कर्मानुपपत्तावपि तत्काले मृतौ तदुक्ताशौचमिति भावः । इदमेवाभिप्रेत्य लक्ष्मीधरेणाप्युक्तम्[७७]–

दन्तजन्मादयः स्वकालोपलक्षकाः । इति ।

खातेनाद्विसमे जलादीति। अद्विसमस्य अद्विवर्षस्य मृतौ शरीरप्रोतपक्षे उदकपिण्डदानादिक्रिया नास्ति । अशौचं यथोक्तमेव । तथा च पारस्करः-

अद्विवर्षे प्रेते मातापित्रोराशौचम् । एकरात्रं त्रिरात्रं वा । शरीरमदग्ध्वा निखनन्ति । इति ।

अनतीतद्विवर्षं तु मृतं भूमौ निधापयेत् ।

इत्यादिवाक्यं शक्तविषयम् । विष्णुः[७८]–

अदन्तजाते प्रेते सद्य एव । नास्याग्निसंस्कारो नोदकक्रिया । दन्तजाते त्वकृतचूडे त्वहोरात्रेण । इति ।

एतत्तु ज्ञातिविषयम् ।

अनतीतद्विवर्षस्तु प्रेतो यत्रापि दह्यते ।
अतिमोहाभिभूतैश्च देशसाधर्म्यमार्दवात् ॥
अशौचं ब्राह्मणानां तु त्रिरात्रं न तु विद्यते ।
राज्ञामेकादशाहं तु वैश्यानां द्वादशाहिकम् ॥
अपि विंशतिरात्रं तु शूद्राणां च भवेत्क्रमात् ।
अनुपनीतो विप्रस्तु राजा चैवाधनुर्ग्रहात् ॥
अगृहीतप्रतोदश्च वैश्यः शूद्रस्त्ववस्त्रयुक् ।
म्रियते यत्र तत्र स्यादाशौचं त्र्यहमेव हि ॥ इति ।

हारलतायां (पृपृ- ४५-४६) तु आदिपुराणवचनमेतत् ।

७७- कृत्यक० शुद्धिकाण्डे (पृ- ३७) ग्रन्थकर्त्तृलक्ष्मीधरभट्टवचनं यथा–

शङ्खः– अजातदन्ते बाले तु सद्यः शौचं विधीयते ।
अहोरात्रात्तथा शुद्धिर्बाले त्वकृतचूडके ॥
तथैवानुपनीते तु त्र्यहाच्छुद्ध्यन्ति बान्धवाः ॥

अत्र अजातदन्तादयः स्वकीयकालोपलक्षकाः । इति ।

७८- विष्णुस्मृतौ (२२/२७-२९) ।

आदन्ताद्दुहितुर्मृतावहरतः पित्रोः सदोर्ध्वं त्र्यहं
भ्रातुश्चारदनात् क्षुरात् परिणयात् स्नानं तथाहस्त्र्यहम् ।
सद्यो ज्ञातिषु चाक्षुरादुपरि चावाग्दानमेका निशा
वाग्दानोपयमान्तरोभयकुले तिस्रो न पित्र्ये परम् ॥१०॥

दहने क्षेपे त्र्यहोऽम्भोऽनल इति । अद्विवर्षशरीरस्य क्षेपपक्षे दाहपक्षेऽपि त्र्यहः । अनलक्षेपे कार्ये दाहे कृते जलादिदानं, त्र्यहाशौचमेवेतिभावः । तथा च अङ्गिराः[७९]—

यद्यप्यकृतचूडो वै जातदन्तश्च संस्थितः ।
तथापि दाहयित्वैनमाशौचं त्र्यहमाचरेत् ॥ इति ।

अत्र अद्विवर्षत्वेऽपि दाहसंस्कारनिमित्तं जलादिदानं त्र्यहाशौचमपीति । अद्विवर्षमरणाधिकारे मनुः[८०]—

अरण्ये काष्ठवत्त्यक्त्वा क्षिपेयुस्त्र्यहमेव च । इति ।

अत्रापि दाहवत् ज्ञातव्यम् । इति प्राग्रदचौडोपनयनमृतस्याशौचनिर्णयः ॥९॥

आदन्ताद्दुहितुर्मृतावहरतः पित्रोः सदोर्ध्वं त्र्यहमिति । दन्तोत्पत्तेः प्राक् दुहितुर्मृतौ पित्रोरेकाहमशौचम् । दन्तजननाद्दन्तजन्मकालात् षण्मासाद्वा उपरि सर्वदा विवाहात् पूर्वमुपरि वा वार्द्धक्यपर्यन्तमपि मृतौ पित्रोस्त्र्यहमेवेत्यर्थः । तत्र याज्ञवल्क्यः[८१]—

अहस्त्वदत्तकन्यासु बालेषु च विशोधनम् । इति ।

पितरौ प्रति अजातदन्तविषयमेतत् । अङ्गिराः[८२]—

अविशेषेण वर्णानामर्वाक् संस्कारकर्मणः ।

७९- याज्ञवल्क्यमिताक्षरायां (३/२३) हारलतायां (पृ- ४५) च । स्मृतिचन्द्रिकायामाशौचकाण्डे (पृ- २४) तु—

दाहयित्वा तथा तत्र कन्याशौचं त्र्यहं चरेत् ।

इत्युत्तरार्द्धपाठः । मुद्रिताङ्गिरसस्मृतौ तु नास्ति ।

८०- मनुस्मृतौ (५/६९) पूर्वार्द्धवचनं यथा—

नास्य कार्योऽग्निसंस्कारो न च कार्योदकक्रिया । इति ।

८१- याज्ञवल्क्यस्मृतौ(३/२४) उत्तरार्द्धवचनं यथा—

गुर्वन्तेवास्यनूचानमातुलश्रोत्रियेषु च ॥ इति ।

८२- याज्ञवल्क्यमिताक्षरायां(३/२४) 'त्रिरात्रात्तु भवेच्छुद्धिः' इति धृतपाठः । मुद्रिताङ्गिरसस्मृतौ तु नास्ति ।

त्रिरात्रेण भवेच्छुद्धिः कन्यास्वह्ना विधीयते ॥ इति ।

दन्तोत्पत्तिपरिणयमध्ये त्रिरात्रविधानं पितृमातृविषयम् । अह्नेति ज्ञातिविषयमेव । विष्णुः[८३]–

प्रत्तानां स्त्रीणां त्रिदिनमशौचं विज्ञायते । तासामन्ये कुर्युः । इति ।

अन्यपदमत्र पितृमातृपरम् । गुरुत्वाद्बहुवचनम् ।

अप्रत्तासु च प्रत्तासु संस्कृतासंस्कृतास्वपि ।
मातापित्रोस्त्रिरात्रं स्यादितरेषां यथाविधि ॥

इति स्मरणात्[८४] । दन्तजननादुपरि सर्वदा पित्रोस्त्रिरात्रमेवेत्यर्थः ।

भ्रातुश्चारदनात् क्षुरात्परिणयात् स्नानं तथाहस्त्र्यहमिति । निगदव्याख्यानमेतत् । भ्रातुरित्युपलक्षणम् । असंस्कृतसोदरभगिन्या अपीति । कन्यामरणाधिकारे कौर्मे[८५]–

आदन्तात्सोदरे सद्य आचूडादेकरात्रकम् ।
आप्रदानात् त्रिरात्रं स्यादिति शास्त्रविनिश्चयः ॥ इति ।

सद्यो ज्ञातिषु चाक्षुरादुपरि चावागदानमेका निशा वागदानोपयमान्तरोभयकुले तिस्र इति । चूडाकालात्पूर्वं जन्मप्रभृतिद्विवर्षमध्ये बालामृतौ ज्ञातीनां सद्यः शौचम् । उपरि तृतीयवर्षप्रभृतिवागदानपर्यन्तमेकाहो-रात्रम् । वागदानविवाहयोर्मध्ये पितृकुले तत्पितुमातृभ्रात्रादीनां वरस्य च सर्वेषामपि त्र्यहाशौचमेव । तद्यथा ब्राह्मे[८६]–

आजन्मनस्तु चूडान्तं यत्र कन्या विपद्यते ।
सद्यः शौचं भवेत्तत्र सर्ववर्णेषु नित्यशः ॥
ततो वागदानपर्यन्तं भवेदेकाहमेव हि ।

८३- मुद्रितविष्णुस्मृतौ नास्ति । वशिष्ठधर्मशास्त्रे(४/१८-१९) तु एवम्–
प्रत्तानां च स्त्रीणां त्रिपुरुषं विज्ञायते ।
प्रत्तानामितरे कुर्वीरंस्ताश्च तेषाम् ॥ इति ।

८४- कालसारे (पृ- २९७) । स्मृतिचन्द्रिकायामाशौचकाण्डे (पृ- ३०) कार्ष्णाजिनिवचनेऽस्मिन् 'प्रत्ताप्रत्तासु योषित्सु' इति प्रथमपादपाठः ।

८५- कूर्मपुराणे उत्तरार्द्धे (२३/३०) 'दशरात्रमतः परम्' इति चतुर्थपादपाठः ।

८६- कृत्यक० शुद्धिकाण्डे (पृपृ- ४२-४३) । मुद्रितब्रह्मपुराणे तु नोपलभ्यते । हारलतायां (पृपृ- ५०-५१), मन्वर्थमुक्तावल्यां (५/७२), शुद्धितत्त्वे (स्मृ०त० द्वितीयभागे, पृ- २६२) च आदिपुराणवचनमेतत् । स्मृतिच० आशौचकाण्डे (पृपृ-३१ - ३२), पद्मपुराणवचनमपि एवमस्ति ।

पञ्चाब्दमध्ये शूद्रबाले मृते त्र्यहाशौचमित्यर्थः । एतत् सर्वेषां दशरात्राशौचपक्षे मन्तव्यम् । स्वजातिनियमाशौचपक्षे तु तेषां द्वित्र्यादि-गुणाशौचमेव । ततो द्विमासाधिकषड्वर्षात्परं गर्भाष्टमाब्दादिकाले अनुपनीतबालमृतौ क्षत्रियवैश्ययोः स्वजात्युक्तमशौचम् । शूद्रस्य पञ्चाब्दात्परं षष्ठाब्दादिकाले स्वजात्युक्तमशौचमित्यर्थः ।

अग्रजविधिः शेष इति । बालबालाशौचावशिष्टेऽशौचान्तरे एतदुक्तं भवति । यथा बालाशौचविषये क्षत्रियादिकमधिकृत्य विशेषविधानमस्ति तथा यत्र यत्राशौचान्तरे विशेषविधानं नास्ति तत्र तत्र ब्राह्मणोक्तविधिरेव ज्ञातव्य इत्यर्थः ।

अथ शूद्रस्य तु दन्ताधस्त्र्यहमिति । दन्तोत्पत्तेः प्राक् शूद्रस्य बालबालामृतौ त्र्यहाशौचम् । तथाहि "त्र्यहाच्छुद्ध्यन्ति बान्धवाः" इत्यनुवृत्तौ शङ्खः[१३]–

अनूढानां तु कन्यानां तथा वै शूद्रजन्मनाम् । इति ।

पारिशेष्यादजातदन्तानां शूद्रजन्मनामिति भावः ।

अत्रिवर्षमरणे पञ्चोपरि द्वादश इति । अत्रिवर्षस्य ऊनद्विवार्षिकस्य मरणे पञ्चाहोरात्राणि । अत उपरि तृतीयवर्षप्रभृति षोडशवर्षमभिव्याप्य अनूढशूद्रमृतौ द्वादशाहोरात्राशौचम् । अत्राङ्गिराः[१४]–

शूद्रे त्रिवर्षान्न्यूने तु मृते शुद्धिस्तु पञ्चभिः ।
अत ऊर्ध्वं मृते शूद्रे द्वादशाहो विधीयते ॥ इति ।

१३- मुद्रितशङ्खस्मृतौ (१५/५-७) सम्पूर्णवचनं यथा--

अहोरात्रात्तथा शुद्धिर्बाले त्वकृतचूडके ।
तथैवानुपनीते तु त्र्यहाच्छुद्ध्यन्ति बान्धवाः ॥
अनूढानां तु कन्यानां तथैव शूद्रजन्मनाम् ।
अनूढभार्यः शूद्रस्तु षोडशाद्वत्सरात्परम् ॥
मृत्युं समधिगच्छेच्चेन्मासात्तस्यापि बान्धवाः ।
शुद्धिं समभिगच्छेयुर्नात्र कार्या विचारणा ॥ इति ।

मनुना चाप्युक्तं (५/७२) यथा–

स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुद्ध्यन्ति बान्धवाः ।
यथोक्तेनैव कल्पेन शुद्ध्यन्ति तु सनाभयः ॥ इति ।

१४- हारलतायां (पृ- ४७), शुद्धितत्त्वे (स्मृ०त० द्वितीयभागे पृ- २६७), निर्णयसिन्धौ(पृ- ३६६) च । मुद्रिताङ्गिरसस्मृतौ तु नोपलब्धम् ।

विप्रादेरसवर्णपुत्रवनिताशौचे क्रमोद्वाहिनः
षट्त्र्येकाहमशौचमक्रमविधौ तत्सप्तपञ्चत्र्यहम् ।
तासां चैकपदे च दासभृतकान्तेवासिनां वासिनां
स्वाम्युक्तं यदि जीवति प्रभुरिदं नोचेत्स्ववर्णोदितम् ॥१२॥

षोडशाब्दानन्तरं सम्पूर्णाशौचविधानात् अर्थात् षोडशवर्षपर्यन्तमेतदिति।

अथोढानूढमृतौ तु षोडशपरं पूर्णमिति । अथ षोडशवत्सरात् परमूढानूढशूद्रमृतौ सम्पूर्णमेव मासाशौचम् । एतदुक्तं भवति । शूद्रस्य विवाह एव संस्कारः । स च षोडशवर्षे विहितः । यस्य कुतश्चित् कारणात् विवाहसंस्कारो न जातस्तदा विवाहोपलक्षिते षोडशवर्षोत्तरकाले विवाहितमृतिवन्मासाशौचमिति भावः । अङ्गिराः–

अनूढभार्यः शूद्रस्तु षोडशाद्वत्सरात्परम् ।
मृत्युं समधिगच्छेचेन्मासाच्छुद्ध्यन्ति बान्धवाः ॥ इति ।

विवाहेऽप्यधः इति । षोडशवत्सरान्नियतविवाहकालात्पूर्वं श्रद्धा-सम्पत्त्यादिना यत्र कुत्रापि पञ्चाब्दोपरिकाले विवाहे जाते तत्र विपत्तौ संस्कारनिमित्तं सम्पूर्णाशौचमेवेति भावः । अङ्गिराः[९५]–

षड्वर्षान्तमतीतो यः शूद्रः सम्म्रियते यदि ।
मासिकं तु भवेच्छौचमित्याङ्गिरसभाषितम् ॥ इति ।

पारिशेष्यादेतत् विवाहितशूद्रविषयमेवेति ॥ ११ ॥

पूर्वं पद्यत्रयेण चातुर्वर्णिकबालबालामृतौ तच्छौचमुक्तम् । सम्प्रति तु त्रयाणां द्विजन्मनां स्वजातिहीनपरजातीयकन्यापरिणये शास्त्रविहित-परिणीताऽसवर्णास्त्रीतत्पुत्रादितत्सर्वसपिण्डानां मिथोऽशौचशुद्धि पद्यद्वयेनाह– विप्रादेरसवर्णपुत्रवनिताशौचे क्रमोद्वाहिनः षट्त्र्येकाह-मशौचमक्रमविधौ तत्सप्तपञ्चत्र्यहमिति । त्रयाणां ब्रह्मक्षत्रियविशां क्रमेण ब्राह्मणीक्षत्रियावैश्याशूद्रापरिणयवताम् असवर्णभार्यानिमित्तसूतक-मृतकयोरेवमसवर्णपुत्रादिसन्ततिनिमित्तोभयाशौचे सति क्रमात् षडह-त्र्यहैकाहाशौचं भवति । अत्राव्यवहितासवर्णाशौचनिमित्ते षडहम्, एकान्तरे त्र्यहम्, द्व्यन्तर एकाहमिति मन्तव्यम् । एतदुक्तं भवति । विप्रस्य क्षत्रियासन्ततिकृताशौचे षडहम्, वैश्यासन्ततिकृताशौचे त्र्यहम्,

९५- हारलतायां (पृ- ४७), शुद्धितत्त्वे (स्मृ०त० द्वि०भा०-पृ-२६७), शुद्धि-कौमुद्यां (पृ- २५), निर्णयसिन्धौ (पृ-३६६) च । मुद्रिताङ्गिरसस्मृतौ तु नास्ति।

शूद्रासन्ततिकृताशौच एकाहम् । एवं क्षत्रियस्य वैश्यासन्ततिकृताशौचे षडहम्, शूद्रासन्ततिकृताशौचे त्र्यहम् । एवं वैश्यस्य शूद्रासन्ततिकृताशौचे षडहमिति भावः । तत्र दक्षः[१६]–

चतुर्णामानुलोम्येन स्त्रीणामेको यदा पतिः ।
दशाहषट्त्र्यहैकाहैः प्रसवे सूतकं भवेत् ॥ इति ।

प्रसवपदं सूतिमृत्युपलक्षणम् । सूतकपदमशौचपरमिति भावः । विष्णुः[१७]-

ब्राह्मणस्य क्षत्रियवैश्यशूद्रेषु सपिण्डेषु षड्रात्रत्रिरात्राहोरात्रैः । क्षत्रियस्य वैश्यशूद्रयोः षड्रात्रत्रिरात्राभ्याम् । वैश्यस्य शूद्रेषु षड्रात्रेण । इति ।

अक्रमविधौ तत्सप्तपञ्चत्र्यहमिति । यदा वैश्यां परिणीय क्षत्रियां शूद्रां वैश्यां वा विप्रो यथालाभं परिणयेत् तदा तत्सन्तत्यशौचं विप्रस्य क्षत्रियादिक्रमेण सप्ताहं पञ्चाहं त्र्यहमिति भावः । अत्र बृहस्पतिः[१८]–

शुद्ध्येद्विप्रो दशाहेन जन्महान्योः स्वयोनिषु ।
सप्तपञ्चत्रिरात्रैस्तु क्षत्रविट्शूद्रयोनिषु ॥ इति ।

जन्महान्योः सूतकमृतकयोः । आनुपूर्व्यग्रहणात् दक्षवाक्यं क्रमविवाहविषयम् । बृहस्पतिवचनं तु सामान्येनाभिधानादर्थादक्रमविषयमेवेति अविरोधः । अक्रमविवाहे प्रायश्चित्तविधानात् अशौचाधिक्यमिति भावः ।

तासां चैकपदे च दासभृतकान्तेवासिनां वासिनां स्वाम्युक्तं यदि जीवति प्रभुरिदमिति । तासामसवर्णस्त्रीणां दासदासीभृत्यशिष्याणां च तदुत्तमवर्णस्वामिसपिण्डाशौचे पतिते यदि स्वामी जीवति तेन सहैकत्र स्थाने कृतवासाः पूर्वोक्तास्तदा तेषां तासां च स्वामिसजातीयविषयविहितदशाहाद्यशौचमिति ।

नोचेत् स्ववर्णोदितमिति । यदि स्वामी न जीवति जीवत्यपि वा स्वामिनि तेन सहैकत्रावस्थितास्ताः स्त्रियो न भवन्ति उभयथाऽपि स्वजातिविहिताशौचमेव तासामिति । विष्णुः[१९]–

पत्नीनामानुलोम्येन स्वामितुल्यमशौचकम् ।
मृते स्वामिन्यात्मीयम् ॥ इति ।

१६- मुद्रितदक्षस्मृतौ (६/१२) 'वर्णानामानुलोम्येन' इति प्रथमपादे पाठः ।
१७- विष्णुस्मृतौ (२२/२२-२४) ।
१८- हारलतायाम् (पृ-५४) । कृत्यक० शुद्धिका० (पृ-२६) हारीतवचनमेवम् ।
१९- मुद्रितविष्णुस्मृतौ (२२/१९-२०) 'पत्नीनां दासानामानुलोम्येन' इतिपाठः ।

पुत्राणामसवर्णिनां च जननीजन्यद्विधाशौचिनां
तातं जीवति चाविभक्तधनके पैत्र्यं न चेन्मातृकम् ।
हीनानां च परोक्तमेव सुहृदां वर्णोत्तमाशौचिनां
स्वाशौचं किल हीनबान्धवजनाशौचे तु वर्णोत्तमे ॥१३॥

बृहस्पतिः[१००]—

दासान्तेवासिभृतकाः शिष्याश्चैकत्र वासिनः ।
स्वामितुल्येन शौचेन शुद्ध्यन्ति मृतसूतके ॥ इति ।

अत्रासवर्णस्त्रीणां दासादीनां च तत्स्वामिसपिण्डाशौचे तत्सहवासस्यैव स्वामितुल्याशौचकारणत्वेन तस्मिन्मृते जीवत्यपि भिन्नवासे च कारणाभावादेव स्वामितुल्याशौचाभावः । किन्तु स्त्रीणां मृतके स्वामिनि सपिण्डत्वात् स्वजात्युक्ताशौचम् । दासादीनां च न किञ्चिदिति । सर्वेषां तु स्वजातिसपिण्डाशौचे स्वोक्तमेवाशौचमिति भावः ॥ १२ ॥

पुत्राणामसवर्णिनां च जननीजन्यद्विधाशौचिनां तातं जीवति चाविभक्तधनके पैत्र्यं न चेन्मातृकमिति । असवर्णस्त्रीजनितपुत्राणां स्वीयस्वीयमातृजनितसूतकमृतकाशौचे यदि तेषां पिता जीवन्नैतैः सह एकधनः स्यात्तदा तेषां पितृजातिविहितदशाहाद्यशौचमेवेति । न चेन्मातृकमिति । यदि तातो न जीवति, जीवन्नपि तैः सह विभक्तधनो वा भवति उभयथाऽपि तेषां मातृजातिविहिताशौचमेवेति भावः । अत्र

१००- कृत्यक० शुद्धिकाण्डे (पृ-२८), हारलतायां (पृ-६०), निर्णयसिन्धौ (पृ-३७७) च । मुद्रितबृहस्पतिस्मृतौ तु वचनमिदं नोपलभ्यते । मनुस्मृत्यनुसारं दासाः सप्त भवन्ति । ते यथा (८/४१५)-

ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्त्रिमौ ।
पैत्रिको दण्डदासश्च सप्तैते दासयोनयः ॥ इति ।

नारदस्मृत्यनुसारं (५/२६-२८)तु दासाः पञ्चदशप्रकाराः भवन्ति । ते यथा—

गृहजातस्तथा क्रीतो लब्धो दायादुपागतः ।
अन्नाकालभृतस्तद्वदाहितः स्वामिना च यः ॥
मोक्षितो महतश्चर्णाद्युद्धप्राप्तः पणे जितः ।
तवाहमित्युपगतः प्रव्रज्यावसितः कृतः ॥
भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः ।
विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः ॥ इति ।

जाबालिः[१०१]—

नानाजातिषु पारक्ये पैतृकं जीवतः पितुः ।
अतीते मातृकं विद्यात् पारक्यमुभयोरपि ॥ इति ।

तथाऽऽपस्तम्बः[१०२]—

क्षत्रविट्शूद्रजातीनां येऽपि स्युर्मृतसूतके ।
तेषां तु पैतृकं शौचं विभक्तानां तु मातृकम् ॥ इति ।

हीनानां तु परोक्तमेव सुहृदां वर्णोत्तमाशौचिनामिति । उत्तमवर्णनिमित्ता शौचे पतिते उत्तमवर्णजातिविहिताशौचमेव हीनवर्णाः कुर्युरित्यर्थः । एतदुक्तं भवति । हीनवर्णपुत्राणामुत्तमवर्णपितृमातृभ्रात्रादिसपिण्डेषु मृतेषु तत्र सूतौ वा तदुत्तमवर्णविहितदशाहाद्यशौचं भवति । तत्र विष्णुः[१०३]—

हीनवर्णानामधिकवर्णेषु तदशौचव्यपगमे शुद्धिः । इति ।

तत्र जातेषु मृतेषु चेति योज्यम् । तथा च कौर्मे[१०४]—

सर्वे तूत्तमवर्णानां शौचं कुर्युरतन्द्रिताः ।
तद्वर्णविधिदृष्टेन स्वं तु शौचं स्वयोनिषु ॥ इति ।

स्वजातीयेष्वशौचेषु स्वमशौचम् । उत्तमवर्णाशौचे हीनवर्णानामपि उत्तमवर्णाशौचमित्यर्थः । उभयत्र सपिण्डोत्तमवर्णपदद्वयोपादानेन पितुरपि परिग्रहः । तं प्रति पृथगनभिधानात् । तेन पितर्युपरतेऽपि असवर्णस्त्रीपुत्राणां पितृजातिविहिताशौचमेवेति भावः ।

स्वाशौचं किल हीनबान्धवजनाशौचे तु वर्णोत्तम इति । हीनवर्णसपत्नमातृभ्रात्रादिसपिण्डेषु मृतेषु तत्र सूतौ च उत्तमवर्णाः स्वस्वजातिविहिताशौचमेव कुर्युरितिभावः । तथा च ब्राह्मे[१०५]—

बान्धवेषु च विप्रस्य क्षत्रविट्शूद्रयोनिषु ।
मृतेषु वाऽथ जातेषु दशाहाच्छुद्धिरिष्यते ॥
क्षत्रियस्यापि वैश्यस्तु वृषलस्तु तथा विशः ।

१०१- कृत्यक० शुद्धिकाण्डे (पृ- २८) । हारलतायां(पृ-५९)तु जाबालः ।
१०२- हारलतायाम्(पृ-५९) । मुद्रितापस्तम्बस्मृतौ तु नास्ति ।
१०३- विष्णुस्मृतौ (२२/२१) ।
१०४- हारलतायाम्(पृ- ५६) ।
१०५- कृत्यक० शुद्धिकाण्डे (पृ-२६) प्रथमपद्यमात्रं ब्रह्मपुराणीयम् । हारलतायां (पृ- ५५) तूभयं पद्यम् आदिपुराणीयम् ।

सूतौ सूतिरथो मृतौ यदि मृतिर्न्यूना समान्त्येतरा-
होरात्रेषु पतेत्तदा तु शुचिता पूर्वाघशेषैर्दिनैः ।
अन्त्याहेऽथ यदाऽथवा तदुषसि द्वाभ्यां त्रिभिश्चाधिकै-
र्योगो यावदयं द्वयोश्च कुलजस्तावज्जनोऽङ्गाशुचिः ॥१४॥

म्रियते जायते बन्धुस्तत्राशौचं स्वकं चरेत् ॥ इति ।

अत्रैवार्थः कौर्मे[१०६]–

क्षत्रविट्शूद्रदायादा ये स्युर्विप्रस्य बान्धवाः ।
तेषामशौचे विप्रस्य दशाहाच्छुद्धिरिष्यते ॥
राजन्यवैश्यावप्येवं हीनवर्णासु योनिषु ।
स्वमेव शौचं कुर्यातां विशुद्ध्यर्थं न संशयः ॥ इति ॥ १३ ॥

चतुर्णामपि वर्णानां यथायथासाङ्कर्यविशेषस्तथा तथैवाशौचाद्धिं निरूप्य सम्प्रति समानजातीययोरेवाशौचयोस्तथाविधाशौचानां वा साङ्कर्ये सति यस्य यस्य यदा काले बलवत्त्वं तस्य तस्यैव शोधकत्वमित्याह– सूतौ सूतिरथो मृतौ यदि मृतिर्न्यूना समान्त्येतराहोरात्रेषु पतेत्तदा तु शुचिता पूर्वाघशेषैर्दिनैरिति । प्रथमस्य सूतकस्य मृतकस्य वाऽहोरात्रं विहाय दशरात्राद्यशौचाहर्गणमध्ये यत्र कुत्रापि दिने वक्ष्यमाणान्तरङ्गत्वादिना समबलं न्यूनबलं वा समानजातीयं पुनरशौचान्तरं भवति तदा स्वमध्य-पतितत्वात् पूर्वाशौचस्य बलवत्त्वेन शोधकत्वे सति यथायथं प्रथमसूतक-मृतकयोरेवावशेषदिनैः शुद्धिर्भवति, न तु सूतकान्तःपातिनो द्वितीयस्य सूतकस्य, बहुसन्निपाते तृतीयचतुर्थपञ्चमादेः । एवं मृतकान्तःपातिनो द्वितीयस्य मृतकस्य, बहुसन्निपाते तृतीयचतुर्थपञ्चमादेर्वा मृतकस्याधिक-दिनाशौचसम्पादकत्वं नास्तीत्यर्थः । अत्र मनुः[१०७]–

अन्तर्दशाहे स्यातां चेत्पुनर्मरणजन्मनी ।
तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशम् ॥ इति ।

पूर्वमरणदशाहमध्ये यदि पुनर्मरणमेवं च जननदशाहमध्ये यदि पुनर्जननं भवति तदा तत्पूर्वाशौचं यावद्दशरात्रादतिक्रान्तं न भवति तावत्कालमेव विप्रादिरशुचिर्भवति । प्रथमाशौचशुद्ध्यैव शुद्धो भवति । याज्ञवल्क्यः[१०८]-

१०६- कूर्मपुराणे उत्तरार्द्धे (२३/३९-४०) ।
१०७- मनुस्मृतौ (५/७९) ।
१०८- याज्ञवल्क्यस्मृतौ (३/२०) ।

अन्तरा जन्ममरणे शेषाहोभिर्विशुद्ध्यति । इति ।

अत्रापि पूर्ववद्व्याख्यानम् । शङ्खः[१०९]–

समानं लघु वाऽशौचं प्रथमेन समापयेत् । इति ।

यदि द्वितीयाद्यशौचं प्रथमेन समानं भवति ततो वा लघु भवति तदा पूर्वाशुद्ध्यैव शुद्धिर्भवति । बौधायनः[११०]–

जननमरणयोः सन्निपाते समानो दशरात्रः । अथ यदि दशरात्राः सन्निपतेयुराद्यं दशारात्रमशौचमानवमाद्दिवसात् । इति ।

अत्र सन्निपातशब्द उभयत्र सम्बध्यते । तेन जननयोः सन्निपाते मरणयोर्वा सन्निपात इत्यर्थः । नवमदिनमभिव्याप्य यत्र कुत्रापि द्वितीयादिसन्निपाते प्रथममेव सोदरमध्यपतितत्वात् सर्वं विशोधात्मकल्पं कृत्वा स्वयमेव शौचसम्पादकमित्यर्थः । अङ्गिराः[१११]–

सूतके सूतकं भूयो यदि तत्स्यादनिर्दशे ।
तच्छेषेणैव शुद्धिः स्यान्मृतके मृतकं तथा ॥ इति ।

सर्वत्र दशरात्रपदं चातुर्वर्णिकाशौचकालोपलक्षणं मन्तव्यमिति ।

अन्त्याहेऽथ यदाऽथवा तदुषसि द्वाभ्यां त्रिभिश्चाधिकैरिति । अशौचाहर्गणस्यावसानदिने दशमद्वादशादौ यदि पूर्वेण समबलं न्यूनबलं वा द्वितीयाद्यशौचं पतति तदा तद्दिनाधिकदिनद्वयेन शुद्धिः । यदि पुनस्तस्यैवावसानदिनस्य उषःकाले अरुणोदयमारभ्य उदयात्पूर्वं समं न्यूनं वा अशौचान्तरमापतेत्तदा तदधिकेन दिनत्रयेण च शुद्धिरित्यर्थः । शङ्खलिखितौ[११२]–

अथ चेदन्तरा म्रियेत जायेत वा शेषैरेव दिवसैः शुद्ध्येत् । अहःशेषे द्वाभ्याम् । प्रभाते तिसृभिः । इति ।

अशौचाहर्गणस्य शेषाहोरात्रप्रभाते अरुणोदयकाल इत्यर्थः ।

१०९- मुद्रितशङ्खस्मृतौ (१५/१०) सम्पूर्णवचनं यथा–
समानं खल्वशौचं तु प्रथमेन समापयेत् ।
असमानं द्वितीयेन धर्मराजवचो यथा ॥ इति ।

११०- बौधायनधर्मसूत्रे (१/५/११/१५-१६) ।

१११- कृत्यक० शुद्धिकाण्डे (पृ- ३०) ''मृतके सूतकं तथा'' इति चतुर्थपादपाठः । मुद्रिताङ्गिरसस्मृतौ तु नास्ति ।

११२- कृत्यक० शुद्धिकाण्डे(पृ- ३०) । मुद्रितशङ्खलिखितस्मृतौ तु नास्ति ।

अशौचे द्विविधेऽन्तरङ्गगुणवद्भावप्रयुक्तं पुन-
र्द्वेधाशौचमघोत्तरं यदि पुराशौचाहपूर्वार्द्धके ।
यावद्यावदभूत्तदेव सकलं पूर्वेण शोध्यं तदा
स्यादर्धे यदि चोत्तरे गुरुतरं पूर्वस्य तच्छोधकम् ॥ १५ ॥

गौतमः[११३]–

तच्चेदन्तः पुनरापतेच्छेषेण शुद्ध्येरन् । रात्रिशेषे द्वाभ्याम् । प्रभाते दिनत्रयेण । इति ।

विष्णुः[११४]–

जननाशौचमध्ये यद्यपरं जननं स्यात्तदा पूर्वाशौचापगमे शुद्धिः । रात्रिशेषे दिनद्वयेन । प्रभाते दिनत्रयेण । मरणाशौचमध्ये ज्ञातिमरणेऽप्येवम् । इति । अत्रापि रात्रिविशेषोऽहोरात्रमिति । अत्र जनने जननं मरणे मरणमिति वदता तुल्यजातीययोरेव सूतकमृतकयोर्वा सन्निपाते उक्ताशौचव्यवस्था मन्तव्या न तु सूतके मृतकं मृतके सूतकमिति । इतोऽपि कारणादेव दिनद्वय-त्रयाधिकव्यवस्थाऽपि अघवृद्धिमत्यशौचे नास्तीति मन्तव्यम् ।

योगो यावदयं द्वयोश्च कुलजस्तावज्जनोऽङ्गाशुचिरिति । द्वयोः सूतकयोर्मृतकयोर्वा मृतकसूतकयोर्वा यावद्दिनमभिव्याप्य योगः सम्बन्धः तिष्ठति तावत्कालं सर्वसपिण्डानामपि अङ्गाशौचमित्यर्थः । अत्र द्वित्रिचतुराद्यशौचसन्निपाते सुतरां यथोत्तरोत्तरमशौचाधिक्यम् अङ्गाशौचे कारणम् इत्येषा युक्तिरुक्तिश्च । ब्रह्मपुराणे[११५]–

सर्वं गोत्रमसंस्पृश्यं तत्र स्यात् सूतके सति । इति ।

तत्रेति सूतक इत्यर्थः । अत्र सूतकपदमशौचमात्रोपलक्षणम् । यदि सूतकमध्ये सूतकान्तरेऽप्यङ्गाशौचं तदा मृतकसन्निपाते सुतरामेवाङ्गाशौचमिति भावः ॥ १४ ॥

पूर्वपद्ये प्रथमाशौचमध्ये समबलन्यूनबलसमानजातीयाशौचान्तर-सन्निपाते शुद्धिरुक्ता । सम्प्रति तु प्रथमाशौचस्य पूर्वार्द्धे उत्तरार्द्धे वा

११३- मुद्रितगौतमधर्मसूत्रे (२/५/६-७) "प्रभाते तिसृभिः" इति पाठः ।

११४- विष्णुस्मृतौ (२२/३५-३८) ।

११५- मुद्रितब्रह्मपुराणे नोपलभ्यते । हारलतायां (पृ-४२) तु उद्धृते अदिपुराणवचनेऽस्मिन् उत्तरार्द्धपाठो यथा–

मध्येऽपि सूतके दद्यात् पिण्डान् प्रेतस्य तृप्तये । इति ।

पञ्चप्रकाराघवृद्धिमदशौचान्तरसन्निपाते सति यथा यथा शुद्धिस्तथा तथा पद्यद्वयेन निरूपयति–अशौचे द्विविधेऽन्तरङ्गगुणवद्भावप्रयुक्तमिति । इदम् अत्राकूतम् । अन्तरङ्गभावप्रयुक्ता, गुणवद्भावप्रयुक्ता, कारणकृता, स्वरूपकृता, दीर्घकालकृता चेति पञ्चप्रकारभेदभिन्नाघवृद्धिर्भवति । तद्यथा– सपिण्डसूतकमृतकमध्ये यदि सजातीयेऽन्तरङ्गगुणभूतसहोदर-तदितरभ्रातृपितृव्यतत्पुत्रपौत्रादिसूतकमृतके स्यातां तदैषा अन्तरङ्गभाव-प्रयुक्ता एकप्रकाराऽघवृद्धिः । तथा सपिण्डमरणापेक्षया स्त्रीणां परमान्तरङ्ग-भूततद्भर्त्तृमरणम् अत्यन्ताघवृद्धिमदशौचं भवति । तथा च श्रीरामायणे सीतां प्रति अनसूयावाक्यम्[११६]–

नातो विशिष्टं पश्यामि बान्धवं वै कुलस्त्रियाः ।
पतिर्बन्धुर्गतिर्भर्त्ता दैवतं गुरुरेव सः ॥ इति ।

तथा सपिण्डमात्रमृतिदशाहमध्ये यदि विद्यायज्ञादिकर्मसदाचारवयो-विशेषादिगुणविशिष्टसपिण्डान्तरमरणं स्यात्तदैषा गुणवद्भावप्रयुक्ता द्वितीयप्रकाराघवृद्धिः । तथा पुत्रोत्पत्तिं प्रति पित्रोरेव कारणत्वादुभयेतर-भ्रात्रादिसर्वसपिण्डसूतिमृतिभ्यां सह पितृमातृमरणाशौचस्य सन्निपाते सर्वतः पितृमातृमरणमेवाघवृद्धिमदशौचमिति एषा कारणकृता तृतीयप्रकारा अघवृद्धिः । तथा सकलप्रकारसूतकापेक्षया मृतकमेव स्वरूपतोऽघवृद्धि-मदशौचं भवति । यथा मृतकेऽस्थिसञ्चयनपर्यन्तं सर्वसपिण्डानामस्पृश्यता अक्षारलवणाशनं मांसमैथुनवर्जनमधःशय्येत्यादिनियमः न तथा सूतके अस्तीति सूतकापेक्षया मृतकमेव स्वरूपतोऽघवृद्धिमदशौचं भवति । एषा स्वरूपकृता चतुर्थप्रकाराऽघवृद्धिः । तथा च एकद्वित्रिचतुरहादिसूतका-पेक्षया दशाहादिसूतकं तथाविधाल्पकालीनमृतकापेक्षया बहुकालीनं मृतकं चिरकालव्यापकाशौचसम्पादकतया अघवृद्धिमदशौचं भवतीत्येषा दीर्घकालकृता पञ्चमप्रकाराऽघवृद्धिः । तत्रैतासां पञ्चप्रकाराघवृद्धीनां मध्ये प्रथमद्वितीययोरन्तरङ्गगुणवद्भावप्रयुक्तयोः अघवृद्ध्योः प्रथमाशौचस्य पूर्वार्द्धे उत्तरार्द्धे वा पतितयोः क्रमेण शोध्यत्वं शोधकत्वं चैकपद्ये निरूप्यत इति भावः । अशौचे द्विविध इति । चतुर्णामपि वर्णानां दशाहादि-रशौचकालो विहितः । तथा च सति तेषां चतुर्णां वर्णानां प्रथमस्य सूतकस्य मृतकस्य वा पूर्वार्द्धे पञ्चषडादिदिनमध्ये यदि पुनरपि

११६- हारलतायां (पृ-६४) कालसारे (पृ-३०४) च ।

समानजातीयान्तरङ्गभावप्रयुक्ता गुणवद्भावप्रयुक्ता वा अघवृद्धिः स्यात् एतद्बाहुल्यं वा तदा प्रथमाशौचशुद्ध्यैव तत्पूर्वार्द्धान्तःपतितानाम् एकद्वित्रिचतुराद्यघवृद्धीनामपि शुद्धिर्भवति । प्रथमाशौचदशाहादिकालादधिकदिनाशौचसम्पादकत्वमघवृद्धीनां नास्तीत्यर्थः । यदि पुनरुत्तरार्द्धे षष्ठादिदशमरात्रिप्रभातमध्ये द्विविधाघवृद्धिः पतति तद्बाहुल्यं वा तदा न पूर्वशुद्ध्यैव शुद्धिः, किन्तु उत्तरार्द्धपतिताघवृद्धिशुद्ध्यैव शुद्ध्यति । एवमुत्तरार्द्धपतिताघवृद्धेरपि पूर्वार्द्धे उत्तरार्द्धे वा पतितानामप्यघवृद्धीनां क्रमेण शोध्यत्वं शोधकत्वं च स्वयमेवोहनीयम् । तथा च देवलः[११७]–

परतः परतः शुद्धिरघवृद्धौ विधीयते ।
स्याच्चेत्पञ्चतमादह्नः पूर्वेणाप्यनुशिष्यते ।। इति ।

पञ्चतमादह्न इत्यनेन पञ्चमाहोरात्रान्तिमक्षण उपलक्ष्यते । तेन तदन्तिमक्षणादूर्ध्वं चेदघवृद्धिस्तदोत्तरभूताघवृद्धिशुद्ध्या शुद्धिः । तथा पञ्चतमाहोरात्रान्तिमक्षणात्पूर्वं चेदघवृद्धिः । उपलक्षणमेतत् । तदन्तिमक्षणेऽपि वाऽघवृद्धिस्तदा पूर्वेणाशौचेन द्वितीयाद्यघवृद्धिरप्यनुशिष्यते । पूर्वेणेत्येतत् पदमादृत्या व्याख्येयम् । एतदुक्तं भवति । प्रथमसजातीयाशौचस्य पञ्चतमादह्नः परतश्चेत् परेषु षष्ठादिदिवसेषु अघवृद्धौ सत्यां परतः परस्य शुद्धिः । परभूताघवृद्ध्यैव शुद्धिर्भवति । द्वितीयाशौचोत्पत्तिमारभ्य दशरात्राद्यशौच-मित्यर्थः । अथ यदि पूर्वत्र प्रथमाहादिपञ्चाहोरात्रमध्ये यत्र कुत्रचिदघवृद्धिः पतति तदा पूर्वेणाप्यनुशिष्यते । पूर्वाशौचेन द्वितीयाद्यघवृद्धिमदशौचमनु-शिष्यते । पूर्वाशौचमेव द्वितीयादेरवशेषकं लोपकमिति यावत् । पूर्वशुद्ध्या एव तत्प्रथमार्द्धान्तःपतिताघवृद्धिमदशौचस्यापि शुद्धिरिति यावत् । अनेकाघवृद्धिसन्निपातेऽप्येष एव न्याय इत्याह देवलः[११८]–

११७- कृत्यक० शुद्धिकाण्डे (पृ- ३१) हारलतायां (पृ- ६४) च । मुद्रितदेवलस्मृतौ तु नास्ति ।

११८- हारलतायां (पृ- ६७) स्मृतिचन्द्रिकाया-माशौचकाण्डे (पृ-५७) च । मुद्रितदेवलस्मृतौ तु नास्ति । कृत्यक० शुद्धिकाण्डे (पृ-३१) वचनस्यास्य उत्तरार्द्धपाठो यथा–

मरणोत्पत्तियोगे तु गरीयो मरणं भवेत् । इति ।

पराशरमाधवीये(३/२८-२९) तु अघानां....इति हारीतवचनम् ।

सर्वाशौचविशोधकं गुरुतमं पित्रोरशौचं ध्रुवं
पूर्वं वा परतोऽथ चैवमनयोर्मातुः पिता शोधकः ।
दीर्घाऽल्पाऽपि परा पुराऽपि सततं सूतेर्मृतिः शोधिका
द्वैधं दीर्घमपीत्थमल्पसदृशो हित्वाऽग्निदं सूतिकाम् ॥१६॥

अघानां यौगपद्ये तु ज्ञेया शुद्धिर्गरीयसा । इति ।

एवमुत्तरार्द्धाघवृद्धेरपि पूर्वार्द्धे उत्तरार्द्धे वा पतितानामघवृद्ध्यन्तराणामपि दुर्बलत्वबलवत्त्वाभ्यां क्रमेण शोध्यत्वं शोधकत्वं च स्वयमेवोहनीयम् । यमः[११९]–

अघवृद्धावशौचं तु पश्चिमेन समापयेत् । इति ।

सर्वोऽप्ययमेवार्थो ब्रह्मपुराणे[१२०] स्फुटीकृतः–

आद्यं भागद्वयं यावत् सूतकस्य तु सूतके ।
द्वितीये पतिते चाद्यात् सूतकाच्छुद्धिरिष्यते ॥
अत ऊर्ध्वं द्वितीयात्तु सूतकान्ताच्छुचिः स्मृतः ।
एवमेव विचार्यं स्यान्मृतके मृतकान्तरम् ॥ इति ।

चतुर्द्धाविभक्तस्य ब्रह्मपुराणीयाशौचकालस्य भागद्वयं पञ्चाहोरात्रावसानपर्यन्तं भवति । तन्मध्ये चेदित्यर्थः । अत ऊर्ध्वमिति–

ततो भागद्वयादूर्ध्वंमुत्तरार्द्धमिति यावत् ।

सर्वमेवैतद्देवलवाक्येन समानार्थमित्युपलक्षणमेतत् । सर्ववर्णानां यावान् अशौचकालस्तस्य पूर्वार्द्धे उत्तरार्द्धे वाऽघवृद्धिसन्निपाते सति उक्तप्रकारा शुद्धिरिति भावः ॥ १५ ॥

गतपद्ये पञ्चप्रकाराघवृद्धीनाम् आद्यद्वितीयाघवृद्धिशुद्धिमुक्त्वा सम्प्रति पूर्वार्द्धेन कारणकृताघवृद्धिशुद्धिमुत्तरपादाभ्यां स्वरूपकृतदीर्घकालकृताघ-

---

११९- याज्ञवल्क्यमिताक्षरायां (३/२०), कृत्यक० शुद्धिकाण्डे (पृ-३१), हारलतायां (पृ-६४) च । स्मृतिचन्द्रिकायामाशौचकाण्डे (पृ-६०), पराशरमाधवीये(३/२८-२९) च सम्पूर्णं यमवचनं यथा–

अघवृद्धिमदाशौचं पश्चिमेन समापयेत् ।
यथा त्रिरात्रे प्रक्रान्ते दशाहं प्रविशेद्यदि ।
अशौचं पुनरागच्छेत् तत्समाप्य विशुद्ध्यति ॥ इति ।

१२०- मुद्रितब्रह्मपुराणे नास्ति । कृत्यक० शुद्धिकाण्डे(पृ-३१) धृतेऽस्मिन् परवर्त्तिपाठो यथा–

वृद्धिशुद्धिं निरूपयति—सर्वाशौचविशोधकमित्यादि । अयमर्थः—यावत् यावत्पुत्रसहोदराद्यन्तरङ्गनिमित्तमरणाशौचं विद्यातपोवयोविशेषयज्ञादि-गुणयुक्तनिमित्तमरणाशौचं च। एवमादिसकलाशौचापेक्षया स्वशरीरोत्पत्ति-हेतुभूतपितृमातृमरणाशौचमेव पुत्रं प्रति गुरुतमं भवति । यत्पितृमातृमरणे दशरात्रादिपर्यन्तमक्षारलवणान्नाशनमधःशय्याब्रह्मचर्यादिनियमः न तथा अशौचान्तरेऽस्तीति भावः । पितृमातृमरणाशौचमेव सर्वेषामशौचान्तराणां शोधकमिति । यावन्ति अघवृद्धिमन्त्यशौचान्तराणि पितृमातृनिमित्ता-शौचस्य पूर्वार्द्धे उत्तरार्द्धे वा पतन्ति पितृमात्रशौचं वा अघवृद्ध्यन्तराणां पूर्वार्द्धे उत्तरार्द्धे वा पतति सर्वत्र पितृमातृनिमित्ताशौचोत्पत्तिदिनमारभ्य दशाहोरात्रादिपर्यन्तं नैव पुत्रस्य शुद्धिरिति भावः । पैठीनसिः[१२१]—

पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः ।
श्रुत्वा तद्दिनमारभ्य दशाहं मृतकी भवेत् ।। इति ।

तथाऽऽग्नेये[१२२]—

पितृमातृनिपाते तु आर्द्रवासा ह्युपोषितः ।
अतीतेऽब्दे प्रकुर्वीत प्रेतकार्यं यथाविधि ।। इति ।

दूरस्थस्य दशाहमध्येऽशौचश्रवणे शेषाहोभिः शुद्धिरुक्ता । यद्यपि दशाहाद्बहिर्मृतकश्रवणे त्र्यहपक्षिण्येकाहोरात्रैरशौचान्तरस्य शुद्धिरुक्ता तथापि पितृमात्रशौचस्य त्वब्दमध्ये कालान्तरे वा श्रवणे सति श्रवणदिनमारभ्य सम्पूर्णाशौचमादार्द्रवासोपवासादिनियमविधानात् अवगम्यते । पितृमात्रशौचस्य तु सर्वतो गुरुतमत्वात् सर्वाशौच-विशोधकत्वमिति भावः । एवं पितृवियोगमध्ये यत्र कुत्रापि दिने मातृवियोगश्चेत् तथा मातृवियोगमध्ये यत्र कुत्रापि दिने पितृवियोगो वा यदि भवति उभयथाऽपि पितृवियोगदिनमारभ्य दशाहोरात्रैरेव पुत्रस्य

मृतकस्यान्तरे यद्यत् सूतकं प्रतिपद्यते ।
सूतकस्यान्तरे वाऽथ मृतकं यत्र विद्यते ।
मृतकान्ते भवेत्तत्र चातुर्वर्ण्येषु नित्यशः ।। इति ।

हारलतायाम् (पृपृ- ६५-६६) आदिपुराणवचनमेतत्।

१२१- याज्ञवल्क्यमिताक्षरायां (३/२१) 'सूतकी भवेत्' इति चतुर्थपादपाठः।

१२२- अग्निपुराणे (१५८/४३) । स्मृतिचन्द्रिकायामाशौचकाण्डे (पृ-५५) दक्षवचनमप्येवम् ।

शुद्धिरित्याह–एवमनयोरिति । तथा चोक्तं महाभारते[१२३]–

माता भस्त्रा पितुः पुत्रो येन जातः स एव सः । इति ।

भस्त्रा चर्मपुटिका । एतेन पितृपुत्रयोरेकात्मप्रदर्शनेन मात्रपेक्षया पितुरेव परमान्तरङ्गत्वं सूचितम् ।

आत्मा वै जायते पुत्रः । इत्यादि ।

अत्रेदं मन्तव्यम् । दशाहमध्ये पित्रोर्न्यूनाधिकमरणे नवश्राद्धपर्यन्तं युगपदेव, मासिकादयस्तु पृथङ्मरणतिथाविति ।

दीर्घाऽल्पाऽपि परा पुराऽपि सततं सूतेर्मृतिः शोधिकेति । सूत्यपेक्षया दीर्घकालीनाऽल्पकालीना वा मृतिः सूतिमध्ये पतति तथा सूतिमध्ये प्रथमभाविनी उत्तरभाविनी वा पूर्वार्द्धे उत्तरार्द्धे वा मृतिमध्ये सूतिः पतति तत्र सर्वप्रकारेण मृतिरेव सूतेः शोधिका । मृतकशुद्ध्यैव सर्वत्र सूतकशुद्धिरिति यावत् । एतेन त्र्यहादिमृतकाशौचशुद्ध्या दशाहादि-सूतकस्यापि शुद्धिरिति स्फुटमुक्तं भवति । अङ्गिराः[१२४]–

अनिर्दशाहे जनने पश्चात् स्यान्मरणं यदि ।

प्रेतमुद्दिश्य कर्त्तव्यं तत्राशौचं स्वबन्धुभिः ॥

यदि पश्चाद्भाविमरणस्य पूर्वशेषः सूतेः पूर्वार्द्धे उत्तरार्द्धे वा पतति तस्य सूतिशोधकत्वं तदा सुतरामेव । पूर्वोत्पन्नमृतकस्य सोदरमध्यपतित-सूतकस्य विशोधकत्वं सिद्धमिति भावः । देवलः–

मरणोत्पत्तियोगे तु गरीयो मरणं भवेत् । इति ।

लघुहारीतः[१२५]–

सूतके मृतकं चेत्स्यान्मृतके सूतकं तथा ।

मृतेन सूतकं गच्छेन्नेतरत् सूतकेन तु ॥ इति ।

षट्त्रिंशन्मते[१२६]–

शावेन शुद्ध्यते सूतिर्न सूतिः शावशोधिनी । इति ।

१२३- कालसारे (पृ-३०६) ।

१२४- कृत्यक० शुद्धिकाण्डे (पृ- ३०) हारलतायां (पृ- ६३) स्मृतिचन्द्रिकायामाशौचकाण्डे (पृ- ५९) कालासारे (पृ- ३०३) च।

१२५- हारलतायाम् (पृ- ६१) ।

१२६- याज्ञवल्क्यमिता० (३/२०) स्मृतिच० आशौ०(पृ- ५८) पूर्वार्द्धम्–

शावाशौचे समुत्पन्ने सूतकन्तु यदा भवेत् । इति ।

ब्राह्मे- मृतकस्यान्तरे यत्र सूतकं प्रतिपद्यते ।
सूतकस्यान्तरे वाऽपि मृतकं प्रतिपद्यते ।
मृतकान्ते भवेत्तत्र शुद्धिर्वर्णेषु नित्यशः ॥ इति ।

अत्र सर्वत्र 'मृतेन सूतकं गच्छेन्नेतरत् सूतकेन तु ।' इति,
तथा 'शावेन शुद्ध्यते सूतिर्न सूतिः शावशोधिनी ।' इति,
तथा 'मरणोत्पत्तियोगे तु गरीयो मरणं भवेत् ।'
इत्यादिवचनैर्मरणस्य गरीयस्त्वविधानात् मृतेरेव सूतिशोधकत्वमवगम्यते । स्वल्पकालीनमपि मृतकं दीर्घकालीनस्यापि सूतकस्य विशोधकमिति । एतदुक्तं भवति । स्वरूपकृताघवृद्धि-दीर्घकालकृताघवृद्ध्योर्मध्ये स्वरूपकृताघवृद्धेरेवाघवृद्धिमत्त्वेन बलवत्त्वमिति भावः ।

द्वैधं दीर्घमपीत्थमल्पसदृश इति । द्वैधमशौचं दीर्घकालीनं चेत् स्यात्तदा बलवत्त्वेनाल्पकालीनस्य समानजातीयस्य दुर्बलत्वात् अल्पाशौचस्य शोधकं भवतीत्यर्थः । एतदुक्तं भवति । अल्पकालीनस्य पूर्वभावि पश्चाद्भावि वा दीर्घकालीनं जननं भवति, पश्चाद्भावेऽपि पूर्वार्द्धे उत्तरार्द्धे वा पतेत्तत् सर्वप्रकारेण दीर्घकालीनमेवाल्पकालीनस्य शोधकमिति । एवमल्पकालीनमृतकस्य[अ] दीर्घकालीनं मृतकमेव शोधकमिति मन्तव्यम् ।

अत्र बृहन्मनुः-
दीर्घाशौचे पतेदल्पमल्पे दीर्घं तदा पतेत् ।[आ]
गुरुणा लघु बाध्येत लघुना नैव तद्गुरु ॥ इति ।

उशनाश्च[१२७]-
स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि ।
न पूर्वेण विशुद्धिः स्यात् स्वकालेनैव शुद्ध्यति ॥ इति ।

दीर्घकालशुद्ध्यैव शुद्धिरित्यर्थः । उपलक्षणमेतत् । दीर्घकालाशौच-मध्येऽल्पकालाशौचेऽप्येवम् । एतत्सर्वं समानजातीयाशौचविषयमेवेति ।

हित्वाऽग्निदं सूतिकामिति । पद्यत्रयेऽपि यथा यथा शुद्धिरुक्ता सर्वत्राग्निदं

१२७- याज्ञवल्क्यमिताक्षरायां (३/२०) स्मृतिच०आशौ० (पृ-६१) कालसारे (पृ- ३०३) शुद्धिसर्वस्वे (पृ-३५) च । मुद्रितौशनसस्मृतौ तु नास्ति ।

अ- सूतकस्य - इति ग-मातृकायाम् ।
आ- अर्द्धमिदं नास्ति क-ग-मातृकाद्वये ।

दूरेऽन्तःप्रसवे श्रुते च मृतके शेषाहमाशौचकं
सर्वेषामघवासरोपरि निशास्तिस्रो विनाशश्रुतौ ।
यावद्वर्षमथ त्रिमासमपरं पक्षिण्यशौचं तत-
स्त्वेकाहं परतस्त्रिमासमुपरि स्नात्वेति लक्ष्मीधरः ॥१७॥

क्रियाकर्त्तारं सूतिकां हित्वैवान्येषां सर्वेषां शुद्धिरित्यर्थः । वृद्धात्रिः[१२८]—

सूतकाद्द्विगुणं शावं शावाद्द्विगुणमार्त्तवम् ।
आर्त्तवाद्द्विगुणा सूतिस्ततोऽपि शवदाहकः ॥ इति ।

शवदाहकः क्रियाकर्त्ता । तत्तत्पूर्वस्मात् सर्वस्मादप्यधिकाशौचवानित्यर्थः । ततः सूतिकाया अपि द्विगुणं शवदाहकः । एतेन अग्निदस्य सूतिकायाश्च सर्वतोऽधिकशौचवत्त्वेन नैव पूर्वशुद्ध्या शुद्धिरपि तु स्वकालेनैव शुद्धिरित्यर्थः । बृहन्मनुः[१२९]—

शावस्योपरि शावे तु सूतकं सूतकोपरि ।
शेषाहोभिर्विशुद्ध्येत उदक्यां सूतिकां विना ॥ इति ।

रजस्वलासूतिकयोश्च स्वोक्तकालेनैव शुद्धिरित्यर्थः । अग्निदेप्येष एवान्वय इत्यर्थः ॥ १६ ॥

पूर्वमशौचसङ्करशुद्धिमुक्त्वा सम्प्रति देशान्तरजातजन्ममरणविलम्ब-श्रवणे यथा यथा शुद्धिस्तथा तथा पदत्रयेण निरूपयति—दूरेऽन्तःप्रसवे श्रुते चेत्याति । निगदव्याख्यानमेतत् । सूतकमध्ये मृतकमध्ये वा दूरस्थेन यद्यशौचं श्रूयते तदा श्रवणसमयमारभ्यावशेषदिनैरेव श्रोतृसपिण्डशुद्धिर्न तु श्रवणाददशरात्रादिभिरित्यर्थः । सर्वेषां वर्णानामशौचाहोपरि प्रथमवर्षमध्ये मृतिश्रवणे त्र्यहाशौचम्, वत्सरादुपरि पञ्चदशमासमध्ये मृतिश्रवणे पक्षिण्यशौचम्, तदुपरि सार्द्धवर्षमध्ये मृतिश्रुतावेकाहमशौचम्, सार्द्धवर्षोपरि मृतिश्रुतौ च स्नानमात्रमित्यर्थः । मनुः[१३०]—

विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशम् ।
यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत् ॥

१२८- निर्णयसिन्धौ(पृ- ३८२) कालसारे (पृ- ३०३) शुद्धिसर्वस्वे (पृ-३२) च । मुद्रितायामत्रिसंहितायामत्रिस्मृतौ वा नास्ति ।

१२९- कालसारे (पृ- ३०४) वृद्धमनुवचनमप्येवम् ।

१३०- मनुस्मृतौ (५/७५-७६) ।

अतिक्रान्ते दशाहे च त्रिरात्रमशुचिर्भवेत् ।

संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुद्ध्यति ॥ इति ।

विगतं विनष्टम् । अनिर्दशं दशाहमध्ये । शेषं सुगमम् । पारस्करः[१३१]–

प्रोषितश्चेत्प्रेयाच्छ्रवणप्रभृति कृतोदकाः कालशेषमासीरन् ।

अतीतश्चेदेकरात्रं त्रिरात्रं वा । इति ।

अतीतश्चेदशौचकाल इति शेषः । गौतमः[१३२]–

श्रुत्वा चोर्ध्वं दशम्याः पक्षिणीम् ।

दशम्या इति अशौचदशमरात्र इत्यर्थः । उभयपार्श्वावस्थितपक्षद्वय-स्थानीयाहर्द्वयं मध्यवर्त्तिनी रात्रिः पक्षिणी प्रभवतीति यावत् । यमः[१३३]–

एका रात्रिर्दिने द्वे च पक्षिणीत्यभिधीयते । इति ।

वशिष्ठः[१३४]–

देशान्तरस्थे प्रेत ऊर्ध्वं दशाहाच्छ्रुत्वैकरात्रमाशौचम् । इति ।

विष्णुः[१३५]–

श्रुत्वा देशान्तरस्थो जन्ममरणे अशौचशेषेण शुद्ध्येत् । व्यतीते त्वशौचे संवत्सरस्यान्तस्त्वेकरात्रेण । ततः परं स्नानेन । इति ।

संवत्सरस्यान्तर्मध्ये । अत्र मनुविष्ण्वादिवचनैर्वत्सरोपरि मृतिश्रुतौ स्नानमात्रविधानात् सार्द्धवर्षपर्यन्तमपि सपिण्डानां मृतिश्रुतौ कल्पतरुकारः[१३६] केनाभिप्रायेण पक्षिण्येकाहाशौचव्यवस्थामाह ।

१३१- पारस्करगृह्यसूत्रे (३/१०/४४-४५) ।

१३२- गौतमधर्मसूत्रे (२/५/१७) ।

१३३- शुद्धिसर्वस्वे (पृ-३७) अङ्गिरोयमवचनेऽस्मिन् पूर्वार्द्धं यथा–

द्विसन्ध्यं सद्य इत्याहुस्त्रिसन्ध्यमहरुच्यते । इति ।

१३४- वशिष्ठधर्मशास्त्रे (४/३६) । देशान्तरलक्षणप्रतिपादने याज्ञवल्क्य-मिताक्षरा(३/२१)धृतबृहस्पतिवचनं यथा–

महानद्यन्तरं यत्र गिरिर्वा व्यवधायकः ।

वाचो यत्र विभिद्यन्ते तद्देशान्तरमुच्यते ॥

देशान्तरं वदन्त्येके षष्टियोजनमायतम् ।

चत्वारिंशद्वदन्त्यन्ये त्रिंशदन्ये तथैव च ॥ इति ।

१३५- विष्णुस्मृतौ (२२/३९-४१) ।

१३६- मुद्रितकृत्यकल्पतरौ शुद्धिकाण्डे (पृ- ३४) ग्रन्थकर्तुः लक्ष्मीधरभट्टस्य वचनं यथा–

द्वेधाऽशौचदिनान्तरा श्रुतिमतः शेषाहमाशौचकं
तद्बाह्ये त्र्यहमात्रिपक्षसमयात् षण्मासतः पक्षिणी ।
वर्षादेकमहर्मृतौ न जनने स्नात्वा तदूर्ध्वं शुचिः
खण्डाशौचमपि स्वकालपरतः श्रुत्वा शुचिः स्नानतः ॥१८॥

एवंप्रकारव्यवस्थापक-मुनिवचनाभावाच्च तदुक्तार्थं किञ्चिदसहमान इवाह लक्ष्मीधरः ॥ १७ ॥

अन्यवचनोक्तव्यवस्थादर्शने त्र्यहपक्षिण्येकाहाशौचव्यवस्थायां स्वमतमाह–द्वेधाशौचदिनान्तरा श्रुतिमतः शेषाहमाशौचकमित्यादि । अत्र सूतकमृतकमध्येऽशौचश्रवणे शेषाहोभिरेव शुद्धिः । एतत् पूर्वोक्ततुल्यम् । विशेषे तु यावानस्ति तमाह– तद्बाह्ये त्र्यहमात्रिपक्षसमयात् षण्माषतः पक्षिणी वर्षादेकमहर्मृतौ न जनने स्नात्वा तदूर्ध्वं शुचिरिति । आङित्यस्य सर्वत्राभिसम्बन्धः । तेनायमर्थः– दशाहबाह्ये आत्रिपक्षात् त्रिपक्षमध्ये मृतिश्रुतौ श्रोतुस्त्र्यहाशौचम् । एवमाषण्मासात् षण्मासमध्ये पक्षिणी । एवमावर्षात् प्रथमवर्षमध्ये श्रुतावेकाहोरात्राशौचमिति । यद्यपि पूर्वोक्तेषु-

अतिक्रान्ते दशाहे च त्रिरात्रमशुचिर्भवेत् ।
संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुद्ध्यति ॥ इति मनुवाक्ये,
श्रुत्वा चोर्ध्वं दशम्याः पक्षिणीम् । इति गौतमवाक्ये,
व्यतीते त्वशौचे संवत्सरस्यान्तस्त्वेकरात्रेण ।

इति वैष्णवादिवाक्येषु तत्कालविशेषे त्र्यहादिव्यवस्था नास्ति तथापि व्यवस्थाविशेषप्रतिपादकविश्वामित्रस्मृतिदर्शनादिदमवगम्यते । त्रिपक्षमध्ये श्रवणे त्र्यहम्, षण्मासमध्ये श्रवणे पक्षिणी, प्रथमाब्दमध्ये श्रवणे चैकाहमशौचमिति ।

सामान्यविधिरस्पष्टः संह्रियते विशेषतः ।
स्पष्टस्य तु विधेर्नान्यैरुपसंहारसम्भवः ॥

इतीयं युक्तिरुक्तिश्च । तथा च विश्वामित्रः–

आत्रिपक्षात् त्रिरात्रं स्यात् षण्मासात् पक्षिणी तथा ।
अहः संवत्सरादूर्ध्वं स्पृष्ट्वैवापो यथापरे ॥ इति ।

अपरे समानोदका यथा तेषां स्नानमात्राच्छुद्ध्यन्ति तथैव संवत्सरोपरि श्रुत्वा

षण्मासाभ्यन्तरे ज्ञातिमरणश्रवणे त्रिरात्रमाशौचम् । तदूर्ध्वं मासत्रयं वा यावत्पक्षिणी । तदूर्ध्वं मासत्रयं यावदेकरात्रम् । अतः परं स्नानोदकदानमात्रमिति ।

स्नानमात्रादेव शुद्ध्यन्तीत्यर्थः । मृतौ न जनने इत्यर्थः । दशाहादिबाह्ये-मृतिश्रुतावेवाशौचं न तु जननश्रुतौ । तथा च देवलः[१३७]—

नाशौचं प्रसवस्यास्ति व्यतीतेषु दिनेष्वपि । इति ।

खण्डाशौचमपि स्वकालपरतः श्रुत्वा शुचिः स्नानतः इति । त्र्यहपक्षिण्येकाहादिन्यूनाशौचमेतत्कालादूर्ध्वं श्रुत्वा स्नानमात्रेण शुद्धो भवतीत्यर्थः । एतदुक्तं भवति । बालाशौचं वा समानोदकाशौचं वा तथा सपिण्डाशौचं वाऽस्तु एतन्मध्ये यद्यदशौचं त्र्यहपक्षिण्येकाहादिरूपं यस्य यस्य लगति तन्मध्ये श्रवणे तत्कालशेषपर्यन्तमेव तस्य तस्य त्र्यहाद्यशौचिनोऽशौचाचरणम् । त्र्यहपक्षिण्येकाहोरात्रादुपरि दशाहमध्ये तदूर्ध्वमपि वा श्रवणे सर्वदा स्नानमात्रेणैव शुद्धिरिति भावः । तथाच मनुः[१३८]—

बाले देशान्तरस्थे च पृथक्पिण्डे च संस्थिते ।
सवासा जलमाप्लुत्य सद्य एव विशुद्ध्यति ।। इति ।

देशान्तरस्थे बाले मृते तथाऽस[illegible]डे देशान्तरस्थे मृते देशान्तरमरण-कारणादेव विलम्बेन त्र्यहाशौचकालात् परं श्रुत्वा सद्यः शुद्धिरित्यर्थः । गौतमः[१३९]—

बालदेशान्तरितप्रव्रजितासपिण्डानां सद्यः शौचम् । इति ।

याज्ञवल्क्यः[१४०]—

प्रोषिते कालशेषः स्यात् पूर्णे दत्त्वोदकं शुचिः ।

इत्यादिवाक्यानि दशाहादुपरि श्रुते सम्पूर्णाशौचे मनुगौतमविष्णु-पारस्करादिवाक्यप्रतिपादितत्र्यहपक्षिण्येकाहाद्यशौचा[अ]विरोधे प्रवेशमन्तर्गतानि अर्थात् खण्डाशौचविषयाण्येव भवन्ति । अतस्तन्मध्ये श्रवणे तत्कालशेषेण शुद्धिं विधाय खण्डाशौचवाक्ये चतुर्थादिदशरात्रमध्ये तदूर्ध्वमपि वा तच्छ्रवणे सद्यःशौचमेतान्येव विदधतीत्यर्थः ।। १८ ।।

१३७- कृत्यक० शुद्धिकाण्डे (पृ- ३४) । याज्ञवल्क्यमिताक्षरायां(३/२१) तु 'नाशुद्धिः प्रसवाशौचे' इति प्रथमपादपाठः ।

१३८- मनुस्मृतौ (५/७८) ।

१३९- गौतमधर्मसूत्रे (२/५/४२) ।

१४०- याज्ञवल्क्यस्मृतौ (३/२१) ।

अ- .....द्यशौचविरुद्धे प्रवेशमलभमानानि- इति ग मातृकायाम् ।

दूरस्थोऽपि सुतो मृतौ च पितरौ सर्वो दशाहात्परं
श्रुत्वोपोष्य तदादिरार्द्रवसनोऽशौचं दशाहं चरेत् ।
स्नात्वाम्भस्तिलतर्पणं प्रतिदिनं कुर्याद्गतेऽप्याब्दिके
ध्यायंस्तौ नियमात् स पुर्वमकृतां कुर्याच्च यत्नात् क्रियाम् ॥१९।
त्रीण्येवाघदिनानि सव्रतमृते जातेऽपि चैकोदके
स्युर्मातामहयोरथ श्वशुरयोरेकालये मातुले ।
दौहित्रे भगिनीसुतव्रतमृते जाते मृतेऽनौरसे
व्यावृत्तादिहते क्रमर्त्विजि तथा याज्ये गृहे श्रोत्रिये ॥२०॥

दूरस्थ इति । सर्वपदेन चतुर्वर्णपरिग्रहः । दशरात्रादिमध्ये पित्रोर्मृतिश्रुतौ पुत्रस्योपवासाधःशय्यादिनियमात् पूर्ववदेव कालविशेषेण शुद्धिर्भवति । विशेषस्तु दशरात्रादुपरि प्रथमाब्दमध्ये द्वितीयाब्दमध्ये वा पितृमातृ-मरणश्रवणे श्रवणानन्तरमेव स्नात्वाऽऽर्द्रवसनस्तदहरुपोष्य श्रवणदिनम् आरभ्य दशाहपर्यन्तं प्रतिदिनं स्नात्वा पित्रोः स्वरूपं ध्यात्वा तर्पयन् अक्षारादिनियमवान् अशौचं परिपालयेदित्यर्थः । यद्यन्येन कुतश्चित्कारणात् शुद्धिक्रिया न कृता स्यात्तदा प्रयतः सन् स एव सर्वमौर्ध्वदेहिकं कर्म कुर्यात् । यदि पुनः भ्रात्रादिना येन केनापि कृता क्रिया भवति तदा पित्र्यर्थस्य निरूढत्वात् पुरुषार्थनियमं सर्वं कुर्वन् दशाहमशौचं चरेदित्यर्थः । तथा च पैठीनसिः—

पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः ।
श्रुत्वा तद्दिनमारभ्य दशाहं मृतकी भवेत् ॥ इति ।

अग्निपुराणे—

पितृमातृनिपाते तु आर्द्रवासा ह्युपोषितः ।
अतीतेऽब्दे प्रकुर्वीत प्रेतकार्यं यथाविधि ॥ इति ।

विश्वामित्रः—

महागुरुनिपाते तु आर्द्रवासोपवासिना ।
अतीतेब्देऽपि कर्तव्यं प्रेतकार्यं यथाविधि ॥ इति ।

निगदव्याख्यानान्येतानि वाक्यानीति ॥ १९ ॥

पूर्वं दूरदेशे जननमरणश्रवणेऽशौचसङ्कोचमुक्त्वा सम्प्रत्यसपिण्ड-विशेषेणाशौचं [अ]पद्यद्वयेनाह—त्रीण्येवाघदिनानि सव्रतमृते जातेऽपि चैकोदके

अ- शौचसङ्कोचभेदेनापि प्रथमतस्त्र्यहाशौचम्- ख-मातृकायामधिकपाठः ।

स्युर्मातामहयोरिति । समानोदके जाते वा उपनीते मृते वा एवं मातामहीमातामहयोरपि मृतयोस्त्रीण्येवाशौचदिनानि स्युरिति । अनुपनीतैकोदकमृतौ चैकाहमिति । तथा च हारीतः[१४१]—

मातामहे त्रिरात्रं स्यादेकाहं त्वसपिण्डतः । इति ।

व्याघ्रपादः—

त्रिरात्रं मातामहयोः । इत्यादि ।

एतद्वचनं पारिशेष्यादनुपनीतसमानोदकमृतिविषयमेवेति ।

जन्मन्येकोदकानां तु त्रिरात्राच्छुद्धिरिष्यते ।

इति मनुवचनात्[१४२],

समानोदकानां त्र्यहम् ।

इति जाबालवचनाच्च समानोदकजन्मनि तथा चोपनीतसमानोदकमरणे त्र्यहाशौचविधानादित्यर्थः । तत्र बृहस्पतिः[१४३]—

दशाहेन सपिण्डास्तु शुद्ध्यन्ति प्रेतसूतके ।
त्रिरात्रेण सकुल्यास्तु स्नात्वा शुद्ध्यन्ति गोत्रजाः ॥

प्रेतसूतके जननमरणयोरित्यर्थः । जाबालः[१४४]—

समानोदकानां त्र्यंहं गोत्रजानामहः स्मृतम् । इति ।

एतेन सप्तपुरुषात्परं चतुर्द्दशपुरुषमभिव्याप्य जन्मनाम्नोरवेदने त्र्यहाशौचम् । जन्मनाम्नोरज्ञाने जन्मनाम्नोर्ज्ञाने चानुपनीतमृतावप्येकाहमिति विवेकः । चतुर्द्दशपुरुषात्परं तु स्नानमात्रमेवेत्यर्थः । चतुर्द्दशपुरुषात्परं गोत्रमुच्यते । [अ]उक्तं च व्याघ्रपादेन[१४५]—

समानोदकभावस्तु निवर्त्तेताचतुर्द्दशात् ।

१४१- कृत्यक० शुद्धिकाण्डे(पृ- ५४) हारीतवचने पूर्वार्द्धं यथा—

परपूर्वासु भार्यासु पुत्रेषु च मृतेषु च । इति ।

१४२- मनुस्मृतौ (५/७१) ।

१४३- कृत्यक० शुद्धिकाण्डे (पृ-११) हारलतायां (पृ-७४) च ।

१४४- याज्ञवल्क्यमिताक्षरायां(३/२४) हारलतायां(पृ-८१)च जाबालवचने अस्मिन् उत्तरार्द्धं यथा—

मातृबन्धौ गुरौ मित्रे मण्डलाधिपतौ तथा । इति ।

१४५- स्मृतिचन्द्रिकायामाशौचकाण्डे(पृ- ३७) ।

अ- उक्तं च......मुच्यते । इति भागो नास्ति क-ग-मातृकाद्वये ।

जन्मनाम्नोः स्मृतेरेव तत्परं गोत्रमुच्यते ॥ इति ।

अथ श्वशुरयोरेकालये मातुले दौहित्रे भगिनीसूते व्रतमृत इति । अशौच्येकगृहे स्थिते सति श्वश्रूश्वशुरयोर्मृतयोस्तथा मातुलपदस्योपलक्षण-तया मातुलानीमातुलयोरपि मृतयोस्तथा दौहित्रे भगिनीसुते उपनीते मृते सत्यपि त्र्यहाशौचमित्यर्थः । एतेन श्वश्रूश्वशुरयोर्मातुलानीमातुलयोः संस्कृतभागिनेयदौहित्राणां जामात्रादिगृहे मृतानां तेषां जामात्रादीनां त्र्यहाशौचमित्यर्थः । तथा च कौर्मे[१४६]—

मातामहानां मरणे त्रिरात्रं स्यादशौचकम् ।
त्रिरात्रं श्वश्रूमरणे श्वशुरे चैतदेव हि ॥ इति ।

प्रचेताः[१४७]—मातुलानीमातुलयोः श्वश्रूश्वशुरयोर्गुरौ ।
ऋत्विजि चोपरते च त्रिरात्रमिति शिष्यके ॥ इति ।

श्वशुरादीनां दौहित्रान्तानामुपरिष्टात् पद्ये भिन्नालये पक्षिण्यादिविधानात् एकगृहावस्थितमरणे सति त्र्यहाशौचं मन्तव्यमित्यर्थः । अङ्गिराः[१४८]—

संस्कृते पक्षिणी रात्रिर्दौहित्रे भगिनीसुते ।
स्वगृहे चेत् त्रिरात्रं स्यादेष धर्मो व्यवस्थितः ॥ इति ।

जाते मृतेऽनौरस इति । औरसव्यतिरिक्तेषु क्षेत्रजादिष्वेकादशविधेषु[१४९] पुत्रेषु जातेषु मृतेषु च त्रिरात्रमित्यर्थः । शङ्खः[१५०]—

अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च ।
परपूर्वासु च स्त्रीषु त्रिरात्राच्छुद्धिरिष्यते ॥ इति ।

ब्राह्मे[१५१]— औरसं वर्जयित्वा तु सर्ववर्णेषु सर्वदा ।

१४६- कूर्मपुराणे उत्तरार्द्धे (२३/३१, ३७) ।
१४७- हारलतायां (पृ-८१) स्मृतिचन्द्रिकायामाशौचकाण्डे (पृ-३९) च ।
१४८- मुद्रिताङ्गिरसस्मृतौ नोपलभ्यते ।
१४९- द्वादशविधाः पुत्रा भवन्ति । मनुना (९/१५९-१६०) उक्तास्ते यथा—

औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादबान्धवाश्च षट् ॥
कानीनश्च सहोदश्च क्रीतः पौनर्भवस्तथा ।
स्वयं दत्तश्च शौद्रश्च षडदायादबान्धवाः ॥ इति ।

१५०- शङ्खस्मृतौ (१५/१३) ।
१५१- कृत्यक० शुद्धिकाण्डे(पृ- ५५) सर्व स्थाने समपाठः ।

क्षेत्रजादिषु पुत्रेषु जातेषु च मृतेषु च ।।
अशौचं तु त्रिरात्रं स्यात् समानमिति निश्चयः ।।

व्यावृत्तादिहते क्रमर्त्विजि तथा याज्ये गृहे श्रोत्रिय इति ।

शस्त्रेणाभिमुखो यस्तु बध्यते शस्त्रधर्मणा ।
यज्ञः संतिष्ठते तस्य सद्यःशौचं विधीयते ।।

इति [१५२]यमवचनादर्थात् पराङ्मुखे सति रणहते उपलक्षणमेतत् । सम्मुखमपि प्रहारक्षेत्रे कालान्तरमृते च तत्सपिण्डानामपि त्र्यहम् । बृहस्पतिः[१५३]–

डिम्भाहवे विद्युता च राज्ञा गोविप्रपालने ।
सद्यःसौचं हतस्याहुस्त्र्यहं चान्ये महर्षयः ।। इति ।

अत्र डिम्भेऽपि लगुडलोष्ठादिहतस्य सङ्ग्रामेऽपि पराङ्मुखहतस्य त्र्यहाशौचमिति व्यवस्था मन्तव्या ।

ऋत्विजि चोपरते च त्रिरात्रम् ।

इति प्रचेतसोक्तम् । त्र्यहमित्यनुवृत्तौ गौतमः[१५४]–

आचार्यतत्पुत्रस्त्रीयाज्यशिष्येषु चैवम् । इति ।

याज्ये याजयितव्ये पूर्वजुष्टऋत्विक्सम्बन्धिनि पुरुष इत्यर्थः । एवमिति त्र्यहमित्यर्थः । गृहे श्रोत्रिय इति । स्वगृहमागते विशिष्टब्राह्मणे मृतेऽपि गृहिणस्त्र्यहमित्यर्थः । अत्र पद्ये श्रोत्रियपदोपादानादश्रोत्रिये तु स्वगृहे मृते गृहिण एकाहमित्युक्तं भवति । मनुः[१५५]–

श्रोत्रिये तूपसम्पन्ने त्रिरात्रमशुचिर्भवेत् ।
अश्रोत्रिये त्वहः कृत्स्नमनूचाने तथा गुरौ ।। इति ।

उपसम्पत्तिः सहवासः । अङ्गिराः[१५६]–

गृहे यस्य मृतः कश्चिदसपिण्डः कथञ्चन ।
तस्याप्यशौचं विज्ञेयं त्रिरात्रं नात्र संशयः ।। इति ।

एकाहमित्यनुवृत्तौ विष्णुः–

असपिण्डे स्ववेश्मनि मृते च । इति ।

१५२- कृत्यक० शुद्धिकाण्डे (पृ- ४७) । मुद्रितयमस्मृतौ तु नास्ति ।
१५३- कृत्यक० शुद्धिकाण्डे (पृ- ४७) मुद्रितबृहस्पतिस्मृतौ तु नोपलभ्यते ।
१५४- गौतमधर्मसूत्रे (२/५/२६) ।
१५५- मनुस्मृतौ (५/८१, ८२) ।
१५६- कृत्यक० शुद्धिकाण्डे (पृ-५७) ।

ऊढायाः प्रसवे गृहे जनकयोस्तस्यास्तयोर्वा मृतौ
सस्त्र्याचार्यसुशिष्ययोः पतिपुनर्भूपांशुलानां मिथः ।
दैवाद्वज्रजलाग्निशस्त्रपतनप्रायैर्मृते निर्गुणे
हिंस्रैर्वा त्र्यहमिच्छया विधिमृतेऽप्येतैरसाध्यातुरे ॥ २१ ॥

अङ्गिरोवचनं श्रोत्रियविषयम् । विष्णुवचनमश्रोत्रियविषयम् । मनुवचनं व्यवस्थितमवगन्तव्यमिति ॥ २० ॥

ऊढायाः प्रसवे गृहे जनकयोरित्यादि । विवाहितायाः दुहितुः पितृगृहे प्रसवे सति जननीजनकयोस्त्र्यहाशौचं भवति । तस्याः विवाहितायाः दुहितुर्मृतौ पित्रोर्वा मृतौ सत्यामन्योन्यं त्र्यहम् । एवं सस्त्र्याचार्यसुशिष्ययोः त्र्यहम् । स्त्री आचार्यानी तत्सहित आचार्य उपनीय वेदाध्यापयिता[१५७] स च सुशिष्यश्चोपनीतः सन्नध्यापितवेदश्चेति । तयोरपि मृतावन्योन्यं त्र्यहम् । आचार्यान्याचार्यमरणे तथाविधशिष्यस्य त्र्यहम् । विशिष्टशिष्यमरणे तयोरपि त्र्यहाशौचम् । एवं पत्युः पुनर्भूपांशुलयोर्वा मृतावन्योन्यं त्र्यहमिति । पुनर्भूश्च पांशुला चेति पुनर्भूपांशुले, पती च ते चेतिविग्रहः । तथा नियतपतेरुपपतेरपि मृतौ पांशुलानां व्यभिचारवतीनां त्र्यहम् । तासां वाऽपि मृतौ द्विविधपत्योरपि त्र्यहमित्यर्थः । ब्राह्मे[१५८]–

दत्ता नारी पितुर्गेहे सूयते म्रियतेऽथवा ।
स्वमशौचं चरेत् सम्यक् पृथक्स्थाने व्यवस्थिता ॥
तद्बन्धुवर्गस्त्वेकेन शुद्ध्यते जनकस्त्रिभिः ॥ इति ।

जनकसपिण्डस्त्वेकाहोरात्रेण । जनक इत्युपलक्षणम् । जनन्यपि त्रिभिरहोरात्रैः शुद्ध्यत इत्यर्थः । वशिष्ठः[१५९]–

प्रत्तानां स्त्रीणां त्रिरात्रमशौचं विज्ञायते ।

बृहस्पतिः[१६०]–

१५७- आचार्यलक्षणमुक्तं मनुना (२/१४०) यथा–
उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः ।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥ इति ।
१५८- कृत्यक० शुद्धिकाण्डे (पृ- ४२) प्रथमपद्यमात्रं पठ्यते ।
१५९- मुद्रितवशिष्ठधर्मशास्त्रे (४/१८) त्रिरात्रमशौचं-स्थाने त्रिपुरुषं - पाठः ।
१६०- मुद्रितबृहस्पतिस्मृतौ नास्ति । शुद्धिकौमुद्यां (पृ- ३१) तु स्मृत्यन्तरवचनमेतत् ।

शावाशौचं त्रिरात्रं स्यान्महागुरुनिपातने ।

दुहितॄणां तु विन्नानां सर्ववर्णेष्वयं विधिः ॥ इति ।

दुहितृपदसमभिव्याहारान्महागुरू पितरौ । विन्नानां विवाहितानां त्र्यहमित्यनुवृत्तौ गौतमः–

आचार्यतत्पुत्रस्त्रीयाज्यशिष्येषु चैवम् । इति ।

आचार्यपुत्रोऽपि यद्यध्यापयति तदा तन्मृतावपि शिष्यस्य त्र्यहमिति । त्रिरात्रानुवृत्तौ विष्णुः[१६१]–

परपूर्वासु भार्यासु प्रसूतासु मृतासु च ।

कौर्मे[१६२]– परपूर्वासु भार्यासु पुत्रेषु कृतकेषु च ।

त्रिरात्रं स्यात्तथाऽऽचार्ये भार्यास्वन्यगतासु च ॥

यथैतासां मरणे पत्युस्त्रिरात्रं तथैव तुल्यन्यायतया नियतपत्युः मृतौ तासामपि त्र्यहमित्यर्थः । ब्राह्मे[१६३]–

पित्रा दत्ता तु या कन्या स्वातन्त्र्यादन्यमाश्रिता ।

यं त्वाश्रितवती भूयस्तस्याशौचं त्र्यहं भवेत् ॥

मृतायां वा प्रसूतायां नान्येषामिति निश्चयः ॥ इति ।

उपपतेरेव त्र्यहाशौचम्, न त्वन्येषां तत्पुत्रादीनामित्यर्थः ।

दैवाद्वज्रजलाग्निशस्त्रपतनप्रायैर्मृते निर्गुणे हिंस्रैर्वा त्र्यहमिति । दैवात् प्रमादात् अदृष्टवशाद्वा वज्रपातजलाग्निप्रवेशशस्त्रभेदनतुङ्गपतनशास्त्रानुमतानशनादिभिर्मृते निर्गुणे जने तथा च हिंस्रैर्व्याघ्रादिभिरपि भक्षणादिना निर्गुणे मृते सति तत्सपिण्डानां त्रिरात्रेण शुद्धिरित्यर्थः । एतदुक्तं भवति । वज्रादिघातादिना मृते त्रिधा व्यवस्था । तत्र प्रमादाद्वज्रादिना निर्गुणजनमरणे काश्यपवचनेन त्र्यहाशौचम् । सगुणजनमरणे अङ्गिरःप्रभृतिवचनैः सम्पूर्णाशौचमुदकदानादिकं च । सगुणानां चोक्तपायैर्बुद्धिपूर्वकमरणे त्र्यहाशौचम् । तथा च काश्यपः[१६४]–

१६१- मुद्रितविष्णुस्मृतौ (२२/४३) पूर्वार्द्धवचनं यथा–

अनौरसेषु पुत्रेषु जातेषु च मृतेषु च । इति ।

१६२- कूर्मपुराणे उत्तरार्द्धे (२३/३४) ।

१६३- कृत्यक० शुद्धिकाण्डे (पृ- ४३) । मुद्रितब्रह्मपुराणे तु नोपलभ्यते । हारलतायाम् (पृ-५१) आदिपुराणवचनमेतत् ।

१६४- कृत्यक० शुद्धिकाण्डे (पृ- ४९) हारलतायां (पृ- ११५) च ।

अनशनहतानामशनिहतानामग्निजलप्रविष्टानां भृगुसङ्ग्रामदेशान्तर-मृतानां गर्भाणां जातदन्तानां त्रिरात्रेण शुद्धिः । इति । अनशनमृतानां देशान्तरमृतानां नैर्गुण्यमिति शेषः । गर्भाणां गर्भसप्तमाष्टम-मासान्तानाम् । जातदन्तानां बालानामिति । बुद्धिपूर्वकमरणे त्वङ्गिरसा सद्यःशौचविधानात् तथा प्रमादमरणेऽपि दाहजलदानादिपूर्वकसम्पूर्णा-शौचविधानात्तदर्थाववगम्येते । सम्पूर्णाशौचविधायकमङ्गिरोवचनं सगुण-प्रमादविषयम्, त्र्यहाशौचविधायकं तु काश्यपवचनं निर्गुणप्रमादमरण-विषय-मेवेति भावः । सगुणानां निर्गुणानां वोक्तपायैर्बुद्धिपूर्वकमरणे आत्मघातितया न दाहो नाप्युदकदानादिकं नाप्यशौचमिति । सर्वमेतत् सुव्यक्तमेवाङ्गिरसा[१६५]–

व्यापादयेदथात्मानं स्वयं योऽग्न्युदकादिभिः ।
विहितं तस्य नाशौचं नाग्निर्नाप्युदकक्रिया ॥
अथ कश्चित्प्रमादेन म्रियतेऽग्न्युदकादिभिः ।
अशौचं तस्य कर्त्तव्यं कर्त्तव्या चोदकक्रिया ॥ इति ।

इच्छया विधिमृतेऽप्येतैरसाध्यातुर इति । बुद्धिपूर्वकप्येतैर्वज्रजला-नलादिभिरुपायैर्विधिविहितैर्दुश्चिकित्स्यकुष्ठादिरोगिण्यपि मृते तत्सपिण्डानां त्रिरात्रेणैव शुद्धिरित्यर्थः । तथा च शुनःपुच्छः–

अग्न्यादिना विपन्नस्य चातुर्वर्ण्यस्य रोगिणः ।
सपिण्डास्तस्य शुद्ध्यन्ति त्रिरात्रेण न संशयः ॥

वृद्धगार्ग्यः–

[१६६]वृद्धः शौचक्रियालुप्तः प्रत्याख्यातभिषक्क्रियः ।
आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः ॥
तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसञ्चयः ।
तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमिष्यते ॥ इति ।

श्राद्धमेकादशाहादिविहितं कर्मेत्यर्थः । अतिवृद्धतया शौचाचारविहीनः तत्क्षणानुभूतमपि यो न स्मरति । प्रत्याख्यातभिषक्क्रियः दुश्चिकित्स्यः महारोगतया स वैद्यपरिछिन्न इति । उभयविधोऽप्येतैरुपायैः शरीरनाशं

१६५- हारलतायाम् (पृ-११३) । मुद्रिताङ्गिरसस्मृतौ तु नोपलभ्यते । कृत्यक० शुद्धिकाण्डे (पृ-४८) शङ्खवचनमप्येवम् ।

१६६- याज्ञवल्क्यमिताक्षरायां (३/६) स्मृत्यन्तरवचने 'शौचस्मृतेर्लुप्तः' पाठः ।

पक्षिण्यन्यमृतौ यदि श्वशुरकौ स्वस्रीयकौ मातुलौ
दौहित्रोऽथ पितुः स्वबान्धवजनौ पित्रोः स्वसा तत्पतिः ।
भ्राता संस्करणे स्वसाऽपि च मिथः पित्रोश्च मातामही
तद्भर्त्ता च तदात्मजा यदि मृताः शिष्यो गुरू क्रित्विजः ॥ २२॥

कुर्वाणो नात्मघाती भवति । तत्सपिण्डानां त्र्यहाशौचम् । अत्र त्रिरात्रं वदन् एवं सप्तविधविहितप्राणान्तिकप्रायश्चित्तमृतावपि सर्वत्र त्रिरात्रमिति दर्शयति । तथा च गौतमः[१६७]–

यस्य तु प्राणान्तिकं प्रायश्चित्तं स मृतः शुद्ध्येत् । सर्वाण्येव तस्मिन्नुदकादीनि प्रेतकर्माणि कुर्युः । इति ॥ २१ ॥

सम्प्रति अशौचसंङ्कोचक्रमेण पक्षिण्येकाहसद्योभिरशौचं पद्यद्वयेनाह- पक्षिण्यन्यमृतौ यदि श्वशुरकौ स्वस्रीयकौ मातुलौ दौहित्र इति । अशौचिगृहवासमन्तरेणान्यस्थाने यदि श्वश्रूश्वशुरस्वसृभागिनेयमातुल-मातुलानीदौहित्राः मृतास्तदा जामत्राद्यशौचिनामुभयपार्श्वस्थपक्षद्वय-स्थानीयहर्द्वययुक्तैकरात्रिलक्षणां पक्षिणीमभिव्याप्याशौचं भवतीति भावः ।

यमः– द्विसन्ध्यं सद्य इत्युक्तं त्रिसन्ध्यमहरुच्यते ।
एका रात्रिर्दिने द्वे च पक्षिणीत्यभिधीयते ॥ इति ।

एतेषामेकगृहादिसन्निधानमरणे त्रिरात्रम्, गृहान्तरग्रामान्तरादिकिञ्चिद्दूरमरणे पक्षिणी, अतिदूरस्थानां दशाहमध्ये मृतिश्रुतावेकाहमिति व्यवस्था मन्तव्येति भावः । मनुः[१६८]–

श्वशुरयोर्भगिन्यां च मातुलान्यां च मातुले ।
पित्रोः स्वसरि च प्रेते पक्षिणीं क्षपयेन्निशाम् ॥

अङ्गिराः– संस्कृते पक्षिणी रात्रिर्दौहित्रे भगिनीसुते ।
स्वगृहे चेत् त्रिरात्रं स्यादेष धर्मो व्यवस्थितः ॥ इति ।

असंस्कृतयोस्तु दौहित्रभगिनीसुतयोर्मृतौ स्नानमात्रम् । तदुक्तम्–

[१६९]मित्रे जामातरि प्रेते दौहित्रे भगिनीसुते ।
श्यालके तत्सुते चैव स्नानमात्रं विधीयते ॥ इति ।

१६७- गौतमधर्मसूत्रे (३/२/१७-१८) ।

१६८- मुद्रितमनुस्मृतौ नास्ति । याज्ञवल्क्यमिता० (३/२४) वृद्धवशिष्ठवचनम् ।

१६९- याज्ञवल्क्यमिताक्षरायां (३/२४) वृद्धवचनेऽस्मिन् 'सद्यः स्नानेन शुद्ध्यति' इत्यन्तिमचरणपाठः ।

एकाहं च विदूरगश्वशुरयोः श्याले च वैवाहिके
मित्रे मातृसहोदरे पितृगृहे स्त्रीसूतिमृत्योः कुले ।
मातुर्बन्धुपु गोद्विजार्थनिहतोपाध्यायजायामृते
सम्राज्येकगुरावथ स्वनृपतौ सज्योतिरुक्तं मृते ॥२३॥

अथ पितुः स्वबान्धवजनावित्यादि । पितृबान्धवस्वबान्धवौ तथा पितृस्वसृमातृस्वसारौ एतयोश्च भर्त्तारौ तथोपनीतभ्रातृविवाहितभगिन्यौ चेदन्योन्यं तथा च पितुर्मातुश्च मातामहौ तद्भर्त्तारौ तत्पुत्रश्च, उपलक्षणमेतत्। मातृपितामही तद्भर्त्ता च, तथाऽध्यापितमात्रशिष्यः, एवमध्यापितमात्रगुरुः त्पुत्रश्च, तथा उपलक्षणमेतत् । ऋत्विजः कुलगुरुं विहायान्येऽप्यात्मनो बहुविधावशिष्टयाजकाः। एते स्वगृहं विना अन्यत्र यदि मृतास्तदा तत्सम्बन्धिनामशौचिनां पक्षिण्यशौचमित्यर्थः । [अ]मनुः[१७०]–

मातुले पक्षिणी रात्रिः शिष्यर्त्विग्बान्धवेषु च । इति ।

बान्धवेषु चेति–

पितृपितृस्वसुः सुताः पितृमातृस्वसुः सुताः ।
पितृमातुलपुत्रांश्च विज्ञेयाः पितृबान्धवाः ॥

इति त्रिविधबान्धवेष्वपीयं व्यवस्था । तथा च[१७१]–

अशौचं पक्षिणीं रात्रिं मृता मातामही यदि । इति ।

पित्रोश्चेति गौतमः[१७२]–

पक्षिणीमसपिण्डे योनिसम्बन्धे सहाध्यायिनि च । इति ।

पितृमात्रोर्मातामहीमातामहतत्सुतादयस्त्वसपिण्डाः योनिसम्बन्धाः भवन्ति। शिष्यो गुरू ऋत्विज इति उदाहृतमेवेति ।

देशकालव्यवायश्च पक्षिण्यां नैव विद्यते ।
सम्पूर्णैव च कर्त्तव्या मृते वर्षशतादपि ॥

इत्येवमादिकं बहुभिरलिखितत्वात् नादृतप्रायमेवेति ॥ २२ ॥

एकाहमित्यादि । अतिदूरगयोः श्वशुरयोः श्यालके वैवाहिके मित्रे

१७०- मनुस्मृतौ (५/८१) ।
१७१- याज्ञवल्क्यमिताक्षरायां (३/२४) पूर्वार्द्धवचनं यथा–
मातुले श्वशुरे मित्रे गुरौ गुर्वङ्गनासु च । इति ।
१७२- गौतमधर्मसूत्रे (२/५/१७-१८) ।

अ- मनुः- मातुले पक्षिणीत्यतः शेषं यावत् भागो नास्ति क-ग-घ-

मातृभ्रातरि च मृतेषु तथा पितृगृहे स्त्रियाः दुहितुः सूतौ मृतौ च पितृकुलजानां तथा मातृबन्धुषु मृतेषु तथा गोब्राह्मणरक्षार्थप्रवृत्ते हते सति तथोपाध्यायतत्पत्नीत्पुत्रेषु मृतेषु तथा सम्राजि भूपतौ मृते एकगुरौ सहाध्यायिनि च मृतेषु एकाहमशौचमित्यर्थः । पराशरः[१७३]–

ब्राह्मणार्थं विपन्नानां दण्डिनां गोग्रहेषु च ।
आहवेषु विपन्नानामेकरात्रमशौचकम् ॥ इति ।

दण्डिनामिति त्रिष्वपि सम्बध्यते । तेन गवार्थे ब्राह्मणार्थे सङ्ग्रामे च दण्डेनैव युद्ध्यमानानां मृतावेकाहः । शस्त्रेण युद्ध्यमानानां मृतौ तु मनुबृहस्पत्युक्तं सद्यःशौचम् । सद्यःशौचमित्यनुवृत्तौ मनुः[१७४]–

डिम्भाहवहतानां च विद्युता पार्थिवेन च ।
गोब्राह्मणस्य चैवार्थे यस्य चेच्छति पार्थिवः ॥
उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च ।
सद्यः संतिष्ठते यज्ञस्तथाशौचमिति स्थितिः ॥ इति ॥

तथेति सद्यःशौचमित्यर्थः । बृहस्पतिः–

डिम्भाहवे विद्युता च राज्ञा गोविप्रपालने ।
सद्यःशौचं हतस्याहुस्त्र्यहं चान्ये महर्षयः ॥ इति ॥

पराङ्मुखहतस्य कालान्तरमृतस्य च त्र्यहविधानमवगन्तव्यमित्यर्थः । सम्राट् द्वादशराजमण्डलाधिपतिः । शुद्ध्येदित्यनुवृत्तौ विष्णुः[१७५]–

आचार्यपत्नीपुत्रोपाध्यायमातुलश्वशुरश्वशुर्यसहाध्यायिशिष्येषु अतीतेषु एकरात्रेण। इति ।

आचार्यपत्नी गौणभूताऽत्र विवक्षिता। उपाध्यायमाहः मनुः[१७६]–

एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः ।
योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते ॥ इति ।

श्वशुर्यः श्यालकः । मातुलयोरपि त्र्यहपक्षिणीविधानात् सपत्नीमातुलविषय

१७३- कृत्यक० शुद्धिकाण्डे (पृ- ४७) । मुद्रितपराशरस्मृतौ (३/३१) तु 'वन्दिगोग्रहणे तथा' इति द्वितीयपादपाठः ।
१७४- मनुस्मृतौ (यथाक्रमं ५/९५, ५/९८) ।
१७५- विष्णुस्मृतौ (२२/४४) ।
१७६- मनुस्मृतौ (२/१४१) ।

मातृकासु। इदमाचरणमिदानीं न प्रवर्त्तते । इति ग-मातृकायामत्र पाठः ।

सद्यो हिंस्रहते धिया च पतिते गोविप्रडिम्भैर्मृते
राज्ञा गुर्वपराधकेऽपि च धिया त्वम्भोविषाग्न्यादिभिः ।
श्यालावुत्तसुताधवाभिचरितक्लीबाभिशस्तेष्वथो
नाशौचं द्विविधं तदश्रुतिमतां प्रारब्धकर्मस्वपि ॥ २४ ॥

एकाहाशौचविधानं मन्तव्यम् ।

अथ स्वनृपतौ सज्योतिरुक्तं मृत इति । स्वदेशाधिपतौ मृते सज्योतिरुक्तम् । दिवा चेदादित्यास्तपर्यन्तं निशि चेत्तदा नक्षत्रास्तपर्यन्तं तद्देशवासिनामशौचमित्यर्थः । मनुः[१७७]–

प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थितः । इति ॥[अ] २३ ॥

[आ]सम्प्रति मरणविशेषे तत्सपिण्डानां सद्यःशौचाभिधानमुपपद्यते– सद्यो हिंस्रहत इत्यादि । मम किं जीवितेन, हिंस्रा अपि मां घ्नन्त्विति वैराग्य-क्रोधादिना प्रवृत्ते हिंस्रैः सिंहव्याघ्रादिभिर्व्यापादिते तस्य आत्मघातितया मरणे तत्सपिण्डानां सद्यःशौचं भवति । तथा महापातकादिना पतितेऽपि मृते तथेच्छया गोविप्रैर्वा डिम्भाहवेन नृपतिरहितयुद्धेन मृते तथाऽपराधे राज्ञा विनाशिते च सद्यःशौचमित्यर्थः । पूर्वमबुद्धिपूर्वं प्रमादेन वज्रानलादिना मृते त्र्यहाशौचमुक्तम् । सम्प्रति तु क्रोधादिना बुद्धिपूर्वकमात्मनि विनाशिते आत्मघातितया तत्सपिण्डानां सद्यःशौचमिति। स्फुटार्थमाह– धिया त्वम्भोविषाग्न्यादिभिरिति । अतिक्रोधादिना मरणव्यवसायबुद्ध्या जलनिमज्जनविषभक्षणाग्निप्रवेश-शस्त्राद्यग्रभेदनशिरस्ताडनडोरबन्धनवृक्षाधःपतनाद्युपायैर्मृते साक्षादात्म-घातितया सद्यःशौचमेवेति भावः । तथा च क्रमेण प्रमाणनिदर्शनम् ।

यमः[१७८]– डिम्भाशनिहतानां च तथैव प्राणसत्रिणाम् ।
नदीश्वापददंष्ट्रिभ्यः सद्यःशौचं विधीयते ॥ इति ।

शङ्खः[१७९]– भृग्वग्न्यनाशकाम्भोभिर्मृतानामात्मघातिनाम् ।

१७७- मनुस्मृतौ (५/८२) ।
१७८- कृत्यक० शुद्धिकाण्डे (पृ- ४६) । मुद्रितयमस्मृतौ तु नास्ति ।
१७९- कृत्यक० शुद्धिकाण्डे (पृ- ४८) । मुद्रितशङ्खस्मृतौ (१५/२१) प्रथमश्लोकमात्रमस्ति। तत्र अनाशक-स्थाने अनाशन-पाठः ।

अ- अतिसंक्षिप्तव्याख्यानं ग-मातृकायाम् ।
आ- अतिसंक्षिप्तव्याख्यानं क-ग-घ-मातृकासु ।

पतितानां च नाशौचं शस्त्रविद्युद्धताश्च ये ॥
व्यापादयेदथात्मानं स्वयं योऽग्न्युदकादिषु ।
विहितं तस्य नाशौचं नाग्निर्नाप्युदकक्रिया ॥
अथ कश्चित्प्रमादेन म्रियेताग्न्युदकादिषु ।
तस्याशौचं विधातव्यं कार्या चास्योदकक्रिया ॥ इति ।

सुमन्तुः[१८०]–

भृग्वग्निजलसङ्ग्रामे देशान्तरे संस्थाप्याशनिमहाध्वनिकानामुदकक्रिया कार्या । सद्यःशौचं भवति । इति ।

महाध्वनिको महापथगमनकल्पेन कृतमरणः । आत्मघातश्च द्विविधः, विहितो निषिद्धश्च । तत्र दुश्चिकित्स्यरोगस्य विहितात्मबधे स्वर्गादिफलम् उक्तम् । ब्राह्मे[१८१]–

दुश्चिकित्स्यैर्महारोगैः पीडितस्तु पुमानपि ।
प्रविशेज्ज्वलनं दीप्तं करोत्यनशनं तथा ॥

इत्यादिनाऽऽत्मबधोपायोक्तेः । तथैव[१८२]–

स्वयं देहविनाशे तु काले प्राप्ते महामतिः ।
उत्तमानाप्नुयाल्लोकानात्मघाती भवेत्क्वचित् ॥ इति ।

निषिद्धात्मबधे तु दोषमाह पराशरः[१८३]–

अतिमानादतिक्रोधात्स्नेहाद्वा यदि वा भयात् ।
उद्बध्नीयात्स्त्री पुमान्वा गतिरेषा विधीयते ॥
पूयशोणितसम्पूर्णे त्वन्धे तमसि दारुणे ।
षष्टिवर्षसहस्राणि हत्वात्मानं विशेन्नरः ॥ इति ।

उद्बन्धनमात्मबधोपायमात्रलक्षणः । आत्मबधोपायानाह गौतमः–

प्रायोनाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनैश्चेच्छताम् । इति ।

प्रायो महाप्रस्थानम् । तत्प्रभृतिभिर्मृत्युमिच्छतामिति शेषः ।

श्यालावुत्तसुताधवाभिचरितक्लीबाभिशस्तेष्विति । श्यालः सपत्नः । साक्षादप्यनुपनीतो वा । आवुत्तो भगिनीपतिः । सुताधवो जामाता ।

१८०- कृत्यक० शुद्धिकाण्डे (पृ- ४८) ।
१८१, १८२- कृत्यक० शुद्धि० (पृपृ- ४९-५०) । मुद्रितब्रह्मपुराणे तु नास्ति ।
१८३- मुद्रितपराशरस्मृतौ (४/१,२) 'त्वन्धे तमसि मज्जति,' 'नरकं प्रतिपद्यते' इति द्वितीयपद्ये क्रमानुसारं द्वितीयचतुर्थपादयोः पाठः ।

अभिचरितं जन्ममरणार्थमभिचारः। अभिशस्तो ब्राह्मणाद्यैः । एतेषु मृतेषु तत्सपिण्डानां सद्यःशौचमित्यर्थः। कौर्मे[१८४]–

सद्यःशौचं समाख्यातं पाशादिमरणे तथा। इति ।

पाशादिशब्देन अभिचारमृतानां ग्रहणम् ।

अथो नाशौचं द्विविधं तदश्रुतिमतां प्रारब्धकर्मस्वपीति । सूतकमृतकाशौचे समुत्पन्ने तु यैः सपिण्डादिभिरशौचं न श्रुतं तेषामज्ञानतया नित्यनैमित्तिककाम्यकर्मकुर्वतामशौचं नास्तीत्यर्थः । तथा प्रारब्धेषु विवाहश्राद्धादिकर्मसु कर्मसमाप्तिपर्यन्तं तत्कर्मकर्तॄणां, यज्ञादौ यजमानप्रभृतीनामप्यशौचाभावः । तथा चोक्तम्–

प्रारम्भो वरणं यागे सङ्कल्पो व्रतसत्रयोः ।
नान्दीमुखं विवाहादौ श्रद्धादौ च पचिक्रिया ॥ इति ॥

श्राद्धदौ पाकक्रियानन्तरं सूतकमृतकरजोदोषो नास्तीत्यर्थः । अशौचस्याश्रवणे दोषाभावो व्यक्त आदिपुराणे–

अपि दातृग्रहीत्रोश्च सूतके मृतकेऽथवा ।
अविज्ञाते न दोषः स्याच्छ्रद्धादिषु कथञ्चन ॥
विज्ञाते भोक्तुरेव स्यात्प्रायश्चित्तादिकं क्रमात् ।
भोजनार्द्धे तु सम्भूते विप्रे दाता विपद्यते ॥
यदा कश्चित्तदोच्छिष्टशेषं त्यक्त्वा समाहितः ।
आचम्य परकीयेन जलेन शुचिरेव सः ॥ इति ।

तथा[१८५]– विवाहयज्ञयोर्मध्ये सूतके सति चान्तरा ।
शेषमन्नं परैर्दद्याद्दातॄन् भोक्तॄंश्च न स्पृशेत् ॥ इति।

दद्याद्दापयेदित्यर्थः । विवाहयज्ञादिपदं सङ्कल्पादिपूर्वकप्रारब्धकर्मोपलक्षणं ज्ञातव्यम् । तथा च यमः[१८६]–

पूर्वसङ्कल्पितेऽर्थे वा तस्मिन्नाशौचमुच्यते ॥ इति ॥ २४ ॥

१८४- मुद्रितकूर्मपुराणे उत्तरार्द्धे (२३/६९) सम्पूर्णवचनं यथा–
सदाहवहतानां च विद्युता पार्थिवैर्द्विजैः ।
सद्यः शौचं समाख्यातं सर्पादिमरणे तथा ॥ इति ।

१८५- कृत्यक० शुद्धिकाण्डे(पृ- ६५) ब्रह्मपुराणवचनेऽस्मिन् 'गृहभोक्तॄंश्च न स्पृशेत्' इति पाठः। याज्ञवल्क्यमिताक्षरायां (३/२८, २९) स्मृत्यन्तरवचनम्।

१८६- कृत्यक० शुद्धिकाण्डे (पृ- ६५) धृतयमवचने पूर्वार्द्धं यथा–

सद्यः सत्रिपुराश्रमिव्रतियतिब्रह्मज्ञलब्धापदां
स्वे स्वे कर्मणि शिल्पिदासभिषजामिष्टस्य राज्ञा द्विजैः ।
ऋत्विग्दीक्षितयोर्निमन्त्रितसदादात्रोर्महोपद्रवे
भृत्यामात्यमहीभुजां च सकलाशौचेऽपि शुद्धिः स्मृता ॥२५॥

[अ]सद्यः सत्रीत्यादि । सत्रिणां ब्रह्मचारिणां गृहीतव्रतानां संन्यासिनां ब्रह्मविदां लब्धापदां च सपिण्डाशौचे संसर्गाद्यशौचे वा पतिते सति सद्यः शौचम् । यथाऽऽह याज्ञवल्क्यः[१८७]–

ऋत्विजां दीक्षितानां च यज्ञियं कर्म कुर्वताम् ।
सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा ॥
दाने विवाहे यज्ञे च सङ्ग्रामे देशविप्लवे ।
आपद्यपि च कष्टायां सद्यःशौचं विधीयते ॥ इति ।

दक्षः[१८८]– स्वस्थकाले त्विदं सर्वमशौचं परिकीर्त्तितम् ।
आपद्गतस्य सर्वस्य सूतकेऽपि न सूतकम् ॥ इति ।

जाबालः[१८९]–

ब्रह्मचारिणि भूपे च यतौ शिल्पिनि दीक्षिते ।
यज्ञे विवाहे शस्त्रे च सूतकं न कदाचन ॥ इति ।

सपिण्डाशौचमेतेषु कदाचिदपि नास्तीत्यर्थः । छन्दोगपरिशिष्टे कात्यायनः[१९०]–

न त्यजेत् सूतके कर्म ब्रह्मचारी स्वयं क्वचित् ।
न दीक्षणात्परं यज्ञे न कृच्छ्रादि तपश्चरन् ॥
पितर्यपि मृते नैषां दोषो भवति कर्हिचित् ।
अशौचं कर्मणोऽन्ते स्यात् त्र्यहं तु ब्रह्मचारिणः ॥ इति ।

स्वे स्वे कर्मणीत्यादि । वर्द्धकिचित्रकारादीनां शिल्पकर्मणि, दासानां

दैवे भये समुत्पन्ने प्रधानाङ्गे विनाशिते ।
मुद्रितयमस्मृतौ तु नास्ति ।
१८७- याज्ञवल्क्यस्मृतौ (३/२८, २९) ।
१८८- दक्षस्मृतौ (६/१८) ।
१८९- कृत्यक० शुद्धि०(पृ- ६३) । हारलतायां(पृ- १०६) शस्त्रे-स्थाने सत्रे ।
१९०- कात्यायनस्मृतौ (२४/५, ६) ।

अ- अतिसंक्षिप्तव्याख्यानं क-ग-घ-मातृकासु ।

स्वं वर्णं च वहेद्दहेदनुगतः स्पृष्टः शवास्थ्नो रुदन्
स्नात्वान्यं यदि तत्समस्त्रिदिवसैर्दग्धेस्थिपार्णे नरे ।
बन्धोर्निर्हरणे त्र्यहात् सहवसन्नह्नाऽन्यवासेऽन्नभुक्
तुल्यस्तैः शवसंस्कृतिं च विधिना कृत्वा क्रियां स्याच्छुचिः ॥२६॥

दासकर्मणि, भिषजां चिकित्साकर्मणि सद्यःशुद्धिर्भवति । तथाऽशौचे सति राजाज्ञाकारिणो यस्य नृपो शुद्धिमिच्छति तथा सम्भूय बहवो ब्राह्मणा यस्य शुद्धिमिच्छन्ति तस्यापि सद्यःशुद्धिर्भवति ।

ऋत्विग्दीक्षितयोरित्यादि । ऋत्विजि दीक्षिते श्राद्धादिनिमन्त्रिते विप्रे सदा दानशीले देशमहोपद्रवे च भृत्यामात्यमहीपतीनां च सपिण्डसूतकमृतकसंसर्गाद्यशौचनिमित्ते जातेऽपि यज्ञश्राद्धदानादितत्तत्कर्मणि सद्यःशुद्धिरेव स्मृतिविहितेतिभावः ॥ २५ ॥

[अ]पूर्वं सूतकमृतकाद्यशौचशुद्धिमुक्त्वा सम्प्रति शववहनदहनस्पर्शनरूपाद्यशौचशुद्धिमाह–स्वं वर्णं चेत्यादि । स्वजातीयशवं यो वहति, यो दहति, योऽनुगच्छति, यो स्पृशति, अस्थिसञ्चयनमध्ये शोकाविष्टो भूत्वा यो वा रोदति, एतेषां सर्वेषां स्नानमात्रादेव शुद्धिः । यथाऽऽहाङ्गिराः[१९१]–

यश्चैनं निर्हरेत्प्रेतमसपिण्डः कथञ्चन ।
स्नात्वा सचेलं स्पृष्ट्वाग्निं तस्मिन्नेवाह्नि शुद्ध्यति ॥

पराशरः[१९२]–

अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजातयः ।
पदे पदे यज्ञफलमानुपूर्व्याल्लभन्ति ते ॥
प्रेतस्पर्शनसंस्कारैर्ब्राह्मणो नैव दूष्यति ।
वोढा वाऽप्यग्निदाता वा सद्यः स्नात्वा शुचिर्भवेत् ॥ इति ।

बौधायनः[१९३]–

परशवोपस्पर्शनेऽनभिसान्धिपूर्वं सचेलोऽपः स्पृष्ट्वा सद्यः शुचिर्भवति । अभिसन्धिपूर्वं तु त्रिरात्रम् । ऋतुमत्यां च । इति ।

१९१- कृत्यक० शुद्धिकाण्डे (पृ- ५८) । मुद्रिताङ्गिरसस्मृतौ तु नोपलभ्यते ।
१९२- कृत्यक० शुद्धिकाण्डे (पृ- ५९) । मुद्रितपराशरस्मृतौ (३/४१) तु प्रथमपद्यमात्रमुपलभ्यते ।
१९३- बौधायनधर्मसूत्रे (१/५/११/३०-३२) ।

अ- अतिसंक्षिप्तव्याख्यानं क-ग-घ-मातृकासु ।

मनुः[१९४]— अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव च ।
स्नात्वा सचैलः स्पृष्ट्वाग्निः घृतं प्राश्य विशुद्ध्यति ॥
दिवाकीर्त्तिमुदक्यां च पतितं सूतिकां तथा ।
शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुद्ध्यति ॥
नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो विशुद्ध्यति ।
आचम्येव तु निःस्नेहं गामालभ्यार्कमीक्ष्य च ॥ इति ।

नारं नरसम्बन्धि । एतत्तु सजातीयास्थिविषयम् । विजातीये वशिष्ठः[१९५]—
मानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमशौचम् । अस्निग्धे त्वहोरात्रम् । शवानुगमने चैकम् । इति ।

रोदने च ब्रह्मपुराणे[१९६] विशुद्धिरुक्ता । तथाहि—

मृतस्य यावदस्थीनि ब्राह्मणस्याहृतान्यपि ।
तावद्यो बान्धवस्तत्र रौति तद्बान्धवैः सह ॥
स्नानात्तस्य भवेच्छुद्धिस्ततस्त्वाचमनं भवेत् ॥ इति ।

यावदस्थिसञ्चया न क्रियते तावद्बान्धवोऽप्युदासीनो रौति चेदित्यर्थः । सजातीयविषयं चैवम् । तस्योपलक्षणतया विजातीयविषये—

[१९७]अनस्थिसञ्चयाद्विप्रो रौति चेत्क्षत्रवैश्ययोः ।
तदा स्नातः सचेलस्तु द्वितीयेऽह्नि विशुद्ध्यति ॥ इति ।

अस्थिसञ्चयनादुपरि चेत् सचेलः स्नातः प्राक्चेदहोरात्रेणेत्यर्थः ।

अनस्थिसञ्चिते शूद्रे ब्राह्मणो रौति चेज्जडः ।
तदा सचेलः स्नातस्तु शुद्ध्यते दिवसैस्त्रिभिः ॥
[१९८]अस्थिसञ्चयनादूर्ध्वमहोरात्रेण शुद्ध्यति ।
सचेलस्नानमन्येषामकृतेऽप्यस्थिसञ्चये ॥
कृते तु केवलं स्नानं क्षत्रविट्शूद्रजन्मनाम् ॥ इति ।

अन्यं यदि तत्सम इति । अन्यवर्णं वहनदहनादि चेत् करोति चातुर्वर्णिकस्तदा शववर्णाशौचशुद्ध्यैव शुद्ध्यतीत्यर्थः । मनुः[१९९]—

१९४- मनुस्मृतौ (५/१०३, ८५, ८७) ।
१९५- याज्ञवल्क्यमिताक्षरायां (३/२६) कृत्यक० शुद्धिकाण्डे (पृ- ५९) च। मुद्रितवशिष्ठधर्मशास्त्रे तु नोपलभ्यते ।
१९६, १९७, १९८- कृत्यक० शुद्धिकाण्डे (पृ- ६१) ।
१९९- मुद्रितमनुस्मृतौ नास्ति । कूर्मपुराणे उत्तरार्द्धे (२३/५२) तु उपलभ्यते।

अवरश्चेद्वरं वर्णमवरं वा वरो यदि ।
अशौचे संस्पृशेत् स्नेहात् तस्याशौचेन शुद्ध्यति ॥

शवरूपमितिशेषः । अनुगमने तु पराशरः[२००]–

प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः ।
अनुगच्छेन्नीयमानं त्रिरात्रमशुचिर्भवेत् ॥ इति ।

शूद्रशवानुगमने त्रिरात्रविधानादर्थादेकाहविधायकं वशिष्ठवचनं क्षत्रियवैश्यशवानुगमनविषयकं मन्तव्यमिति भावः ।

त्रिदिवसैर्दग्धेऽस्थिपार्णे नर इति । विदेशस्थे मरणे शवालाभे यत्र विधिबलादस्थिदाहः अस्थ्यभावे पर्णनरदाहो वा क्रियते तत्रोभयत्र दाहात्परं सपिण्डादेस्त्रिभिरहोरात्रैः शुद्धिरित्यर्थः । छन्दोगपरिशिष्टे कात्यायनः[२०१]–

विदेशमरणेऽस्थीनि ह्याहृत्याभ्यज्य सर्पिषा ।
दाहयेदूर्णयाऽऽच्छाद्य पात्रन्यासादि पूर्ववत् ॥
अस्थ्नामलाभे पार्णानि सकलान्युक्तयाऽऽवृता ।
दाहयेदस्थिसङ्ख्यानि ततः प्रभृति सूतकम् ॥ इति ।

पर्णनरदाहे त्र्यहाशौचविशेषविधानादेतत्संनियोगावशिष्टास्थिदाहे त्र्यहाशौचमेवेति भावः । आहिताग्निविषयं चेदम् । अनाहिताग्निविषये तु आदिपुराणे[२०२]–

आहिताग्न्योश्च दम्पत्योर्यस्त्वादौ म्रियते भुवि ।
तस्य देहः सपिण्डैश्च दग्धव्यस्त्रिभिरग्निभिः ॥
पश्चान्मृतस्य देहस्तु दग्धव्यो लौकिकाग्निना ।
अनाहिताग्नेर्देहस्तु दाह्यो गृह्याग्निना द्विजैः ॥
तदभावे पलाशोत्थैः पत्रैः कार्यः पुमानपि ।
शतैस्त्रिभिस्तथा षष्ट्या शरवृन्तैर्विधानतः ॥
वेष्टितव्यस्तथा यत्नात्कृष्णसारस्य चर्मणा ।
ऊर्णासूत्रेण वध्वा तु प्रलेप्तव्यास्तथा यवैः ॥

२००- पराशरस्मृतौ (३/४७) ।

२०१- कृत्यक० शुद्धिकाण्डे (पृ- ७९) । मुद्रितकात्यायनस्मृतौ (२३/२,३) तु द्वितीयपद्ये तृतीयपादे "भर्जयेदस्थिसङ्ख्यानि" इति पाठः ।

२०२- कृत्यक० शुद्धिकाण्डे (पृ- ७६) व्रह्मपुराणवचनेऽस्मिन् 'पश्चान्मृतस्य' स्थाने 'पश्चाल्लेप्यास्य', तृतीयपद्ये 'शतैस्त्रिभिस्तथा षड्भ्याम्', इति पाठः ।

सुपिष्टैर्जलसम्मिश्रैर्दग्धव्याश्च तथाग्निना ।
असौ स्वर्गाय लोकाय स्वाहेत्युक्त्वा सबान्धवैः ॥
एवं पर्णनरं दग्ध्वा त्रिरात्रमशुचिर्भवेत् ॥ इति ।

बन्धोर्निर्हरणे त्र्यहात् सहवसन्नह्वाऽन्यवासेऽन्नभुक् तुल्यस्तैरिति । मातृबान्धवादेर्निर्हरणादि कृत्वा तत्पुत्रादिगेहे यद्यशौचमध्ये वसति तदा त्र्यहाच्छुद्धो भवति । अन्यगृहे चेद्वसति तदैकाहोरात्रेण । पैठीनसिः[२०३]–

असम्बन्धिनं द्विजं वहित्वा सद्यःशौचम् । सम्बन्धे त्रिरात्रम् । इति । तथा च मनुः[२०४]–

असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत् ।
विशुद्ध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान् ॥
यद्यन्नमत्ति तेषां तु दशाहेनैव शुद्ध्यति ।
अनदन्नन्नमह्नैव न चेत्तस्मिन् गृहे वसेत् ॥ इति ।

बन्धुवदिति अबन्धुमपि बन्धुवत्स्नेहादिपूर्वं निर्हृत्य तत्सुतादिगृहे वसन् त्र्यहाच्छुद्ध्यति, तदन्नं भुञ्जानो दशाहेन, निर्हृत्यान्यत्र वसति तदन्नं च नाश्नाति स चाहोरात्रेणेत्यर्थः । केवलमबन्धुं स्नेहादिमन्तरेणादृष्टमात्रबुद्ध्या वहित्वा दहित्वा स्नानमात्रेण शुद्धिरिति शेषः । अङ्गिराः[२०५]–

अन्तर्दशाहे भुक्त्वा तु सूतके मृतकेऽपि वा ।
असंस्पृश्यो भवेत्तावद्यावत्तद्व्रतमाचरेत् ॥ इति ।

एतत्तु सजातीयविषयम् । विजातीये तु बाह्यजात्युक्तमशौचमिति । तथा च गौतमः[२०६]–

अवरश्चेद्वर्णः पूर्वं वर्णमुपस्पृशेत्पूर्वो वाऽवरं तत्र शवजात्युक्तम् आशौचम् । इति ।

उपस्पर्शनं निर्हरणम् । तैः सह शयनासनादिकरणे तथेत्यादि बृहस्पतिः[२०७]–

यस्तैः सहासपिण्डोऽपि प्रकुर्याच्छयनासनम् ।

२०३- कृत्यक० शुद्धिकाण्डे (पृ- ५८) ।
२०४- मनुस्मृतौ(५/१०१, १०२) ।
२०५- कृत्यक० शुद्धिकाण्डे (पृ-५६) । मुद्रिताङ्गिरसस्मृतौ तु नोपलभ्यते ।
२०६- मुद्रितगौतमधर्मसूत्रे (२/५/२७) तु 'शवोक्तमाशौचम्' इति पाठः ।
२०७- कृत्यक० शुद्धिकाण्डे (पृ- ५७) । मुद्रितबृहस्पतिस्मृतौ तु नोपलभ्यते ।

बान्धवोऽबान्धवो वाऽपि स दशाहेन शुद्ध्यति ॥ इति ।

सर्वं चैतद्ब्रह्मपुराणे[२०८] स्फुटीकृतम् । तथा–

योऽसवर्णं तु मूल्येन नीत्वा चैव दहेन्नरः ।
अशौचं तु भवेत्तस्य प्रेतजातिसमं तदा ॥
सर्वे वर्णाः सजातीयं दग्ध्वा त्र्यहमशौचिनः ।
भवन्ति परजातीयं निर्हृत्य परजातिवत् ॥
सजातिमसपिण्डं तु दग्ध्वा तद्गेहभोजिनः ।
स्वजात्युक्तमशौचं तु चरन्ति जडबुद्धयः ॥
अन्यजातिं मृतं दग्ध्वा तदन्नं भुञ्जते च ये ।
कुत्सितास्ते नराः प्रोक्तास्तस्याशौचस्य भागिनः ॥
दाहयित्वा तु मूल्येन गुरुं प्रेतं भवेत्ततः ।
अशौचं दशरात्रं तु शिष्यस्येति विनिश्चयः ॥
आचार्यं वाऽप्युपाध्यायं गुरुं वा पितरं तथा ।
मातरं वा स्वयं दग्ध्वा व्रतस्थस्तत्र भोजनम् ॥
कृत्वा पतति नो तस्मात् प्रेतान्नं तस्य भक्षयेत् ।
अन्यत्र भोजनं कुर्यान्न च तैः सह संवसेत् ॥
एकाहमशुचिर्भूत्वा द्वितीयेऽह्नि विशुद्ध्यति ॥ इति ।

शवसंस्कृतिं च विधिना कृत्वा क्रियां स्याच्छुचिरिति । शवजातिविशेषेण यथोक्तविधिना पुरद्वारबहिष्करणवहनदहनादिसंस्कारं कृत्वा यथोक्तविधानेन जलपिण्डदानास्थिसञ्चयनदशाहादिरूपक्रियां कृत्वा तथा श्राद्धादिसपिण्डीकरणान्तस्य मध्यक्रियां कृत्वा शुद्धो भवतीत्यर्थः । सपिण्डीकरणोत्तरकालीनाब्दिकपार्वणश्राद्धाद्युत्तरक्रियायामशौचं नास्तीति पूर्वमध्यक्रिययोरत्र परिग्रहः । मनुः[२०९]–

दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् ।
पश्चिमोत्तरपूर्वैस्तु यथायोगं द्विजन्मनः ॥
न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण नाययेत् ।
अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंस्पर्शदूषिता ॥ इति ।

२०८- कृत्यक० शुद्धिकाण्डे (पृपृ- ५९-६०) 'तदा' स्थाने 'सदा' पाठः । मुद्रितब्रह्मपुराणे तु नोपलभ्यते ।

२०९- मनुस्मृतौ (५/९२, १०४) ।

यमः[२१०]— यस्यानयति शूद्रोऽग्निं तृणकाष्ठहवींषि च ।
प्रेतत्वं हि सदा तस्य स चाधर्मेण लिप्यते ॥ इति ।

अग्निहविर्नयनं न सर्वथा शूद्रेण कर्त्तव्यम् । असम्भवे तृणकाष्ठनयनेऽपि द्विजैरेव चितारोपणीयेति । आहिताग्नेः शरीरं तु कात्यायनाद्युक्तविधिना पतनपात्रन्यासादिपूर्वकं घृतेनाभ्यज्य त्रेताग्निना दाह्यम्, स्मार्त्ताग्नेर्गृह्याग्निना, इतरस्य तु लौकिकाग्निनेति । कौर्मे[२११]—

आहिताग्निर्यथान्यायं दाह्यश्च त्रिभिरग्निभिः ।
अनाहिताग्निर्गृह्येण लौकिकेनापरो जनः ॥ इति ।

शुद्धलौकिकेनेत्यर्थः । छन्दोगपरिशिष्टे कात्यायनः[२१२]—

हुतायां सायमाहुत्यां दुर्बलश्चेद्गृही भवेत् ।
प्रातर्होमस्तथैव स्याज्जीवेच्चेद्वा पुनर्भवेत् ॥
दुर्बलं स्नापयित्वा तु शुद्धचैलादिसंवृतम् ।
दक्षिणाशिरसं भूमौ बर्हिष्मत्यां निवेशयेत् ॥
घृतेनाभ्यक्तमाप्लाव्य सुवस्त्रमुपवीतिनम् ।
चन्दनोक्षितसर्वाङ्गं सुमनोभिर्विभूषितम् ॥
हिरण्यशकलान्यस्य क्षिप्त्वा छिद्रेषु सप्तसु ।
मुखेष्वथापिधायैनं निर्हरेयुः सुतादयः ॥
आमपात्रेऽन्नमादाय प्रेतमग्निपुरःसरम् ।
एकोऽनुगच्छेत्तस्यार्द्धमर्द्धं पथ्युत्सृजेद्भुवि ॥
अर्द्धमादहनं प्राप्त आसीनो दक्षिणामुखः ।
सव्यं जान्वाच्य शनकैः सतिलं पिण्डदानवत् ॥
अथ पुत्रादिराप्लुत्य कुर्याद्दारुचयं महत् ।
भूप्रदेशे शुचौ युक्ते पश्चाच्चित्यादिलक्षणे ॥
तत्रोत्तानं निपात्यैनं दक्षिणाशिरसं मुखे ।
आज्यपूर्णां स्रुचं दद्याद्दक्षिणाग्रां नसि स्रुवम् ॥
पादयोरधरां प्राचीमरणीमुरसीतराम् ।

२१०- याज्ञवल्क्यमिताक्षरायाम् (३/२) । कृत्यक० शुद्धिकाण्डे (पृ-६९) 'यस्त्वानयति' इति प्रथमपादे । मुद्रितयमस्मृतौ तु वचनमिदं नोपलभ्यते ।

२११- कूर्मपुराणे उत्तरार्द्धे (२३/७७) ।

२१२- कात्यायनस्मृतौ (२१/२-१६, २३/७) ।

पार्श्वयोः शूर्पचमसे सव्यदक्षिणयोः क्रमात् ॥
मूषलेन सह न्युब्जमन्तरुर्वोरुलूखलम् ।
चात्रे विलीकमत्रैवमनश्रुनयनो विभीः ॥
अपसव्येन कृत्वैतद्वाग्यतः पितृदिङ्मुखः ।
अथाग्निं सव्यजान्वक्तो दद्याद्दक्षिणतः शनैः ॥
अस्मात्त्वमधिजातोऽसि त्वदयं जायतां पुनः ।
असौ स्वर्गाय लोकाय स्वाहेति यजुरीरयन् ॥
एवं गृहपतिर्दग्धः सर्वं तरति दुष्कृतम् ।
यश्चैनं दाहयेत्सोऽपि प्रजां प्राप्नोत्यनिन्दिताम् ॥
यथा स्वायुधधृक् पान्थो ह्यरण्यान्यपि निर्भयः ।
अतिक्रम्यात्मनोऽभीष्टं स्थानमिष्टं च विन्दति ॥
एवमेषोऽग्निमान् यज्ञपात्रायुधविभूषितः ।
लोकानन्यानतिक्रम्य परं ब्रह्मैव विन्दति ॥
अनयैवावृता नारी दग्धव्या या व्यवस्थिता ।
अग्निप्रदानमन्त्रोऽस्या न प्रयोज्य इति स्थितिः ॥ इति ।

एवं शाखान्तराहिताग्निषु स्वीयस्वीयशारवोक्तविधानं ग्राह्यमिति । ब्रह्मपुराणे[२१३]–

आहिताग्नौ विदेशस्थे मृते सति कलेवरम् ।
निधेयं नाग्निभिर्यावत्तदीयैरपि दह्यते ॥ इति ।

एवमादिषूक्तं ज्ञातव्यम् । तथा–

[२१४]दरिद्रोऽपि न दग्धव्यो नग्नः कस्याश्चिदापदि ।
केनापि वस्त्रखण्डेनाच्छादितव्यः प्रयन्ततः ॥ इति ।

अतः परमत्र प्रासङ्गिकमुपयुक्तं शवसंस्कृतिक्रियेतिपदद्वयसूचितार्थम् अधिकमप्युच्यते । गर्भिणीमरणे तु बृहद्व्यास आह–

गर्भिण्यां तु मृतायां तु गर्भजीवनशङ्कया ।
विमोच्य गर्भं दग्धव्या एवं धर्मो न हीयते ॥ इति ।

सूतिकारजस्वलामृतौ पराशरः[२१५]–

२१३- कृत्यक० शुद्धिकाण्डे (पृ- ७४) । मुद्रितब्रह्मपुराणे तु नास्ति ।
२१४- कृत्यक०शुद्धि०(पृ- ७७)ब्रह्मपुराणवचनम् । मुद्रितब्रह्मपुराणे तु नास्ति ।
२१५- याज्ञवल्क्यमिताक्षरायाम् (३/२०) । मुद्रितपराशरस्मृतौ तु नास्ति ।

सूतिकायां मृतायां तु कथं कुर्वन्ति याज्ञिकाः ।
कुम्भे सलिलमादाय पञ्चगव्यं तथैव च ॥
पुण्यर्ग्भिरभिमन्त्र्यापो वाचा शुद्धिं लभेत्ततः ।
तेनैव स्नापयित्वा तु दाहं कुर्याद्यथाविधि ॥
पञ्चभिः स्नापयित्वा तु गव्यैः प्रेतां रजस्वलाम् ।
वस्त्रान्तरावृतां कृत्वा दाहयेद्विधिपूर्वकम् ॥ इति ।

अग्निप्रवेशविधिनिषेधौ—

तत्राङ्गिराः[२१६]—

मृते भर्त्तरि या नारी समारोहेद्धुताशनम् ।
साऽरुन्धतीसमाचारा स्वर्गलोके महीयते ॥
तिस्रः कोट्यर्द्धकोटी च यानि लोमानि मानवे ।
तावन्त्यब्दानि सा स्वर्गे भर्त्तारं याऽनुगच्छति ॥
व्यालग्राही यथा व्यालं बलादुद्धरते विलात् ।
तद्वद्भर्त्तारमादाय तेनैव सह मोदते ॥
मातृकं पैतृकं चैव यत्र कन्या प्रदीयते ।
पुनाति त्रिकुलं नारी भर्त्तारं याऽनुगच्छति ॥
तत्र सा भर्त्तृपरमा परा परमलालसा ।
क्रीडते पतिना सार्द्धं यावदिन्द्राश्चतुर्द्दश ॥
ब्रह्महा वा कृतघ्नो वा मित्रघ्नो वाऽपि यो नरः ।
तं वै पुनाति सा नारी इत्याङ्गिरसभाषितम् ॥
साध्वीनामेव नारीणामग्निप्रपतनादृते ।
नान्यो धर्म्मो हि विज्ञेयो मृते भर्त्तरि कर्हिचित् ॥
यावन्नाग्नौ दहेद्देहं मृते पत्यौ पतिव्रता ।
तावन्न मुच्यते नारी स्त्रीशरीरात् कथञ्चन ॥

सुवृत्तभावार्पितभर्त्तृकाणां स्त्रीणां वियोगक्षतकातराणाम् ।
तासां प्रभावः सुमते गते किं नाग्निप्रवेशादपरोऽस्ति मार्गः ॥ इति ।

वृत्तमाचारः । भावोऽभिप्रायः । वियोगः प्रहारः । क्षतः व्रणः । व्यासः[२१७]-

---

२१६- शुद्धितत्त्वे (स्मृतितत्त्वे द्वितीयभागे पृ- २३४) 'मृते भर्त्तरि कर्हिचित्' इति यावदुद्धृतम् । मुद्रिताङ्गिरसस्मृतौ तु नास्ति ।

२१७- शुद्धिकौमुद्याम् (पृपृ- ८३-८४) अङ्गिरोवचनमप्येवम् ।

दयितं याऽन्यदेशस्थं प्रेतं श्रुत्वा पतिव्रता ।
समारोहति दीप्तेऽग्नौ तस्याः शक्तिं निबोधत ॥
यदि प्रविष्टो नरकं वद्धः पाशैः सुदारुणैः ।
सम्प्राप्तो यातनास्थानं गृहीतो यमकिङ्करैः ॥
तिष्ठते विवशो दीनो वेष्ट्यमानः स्वकर्मभिः ।
व्यालग्राही यथा व्यालं विलाद्गृह्णात्यशङ्कितः ।
तद्वद्भर्त्तारमादाय स्वर्गं याति तपोबलात् ॥
तत्र सा भर्त्तृपरमा स्तूयमानाऽप्सरोगणैः ।
क्रीडते पतिना सार्द्धं यावदिन्द्राश्चतुर्द्दश ॥ इति ।

ब्राह्मे[२१८]– देशान्तरमृते तस्मिन् साध्वी तत्पादुकाद्वयम् ।
निधायोरसि संशुद्धा प्रविशेज्जातवेदसम् ॥
ऋग्वेदवादात् साध्वी स्त्री न भवेदात्मघातिनी ।
त्र्यहाशौचे विनिवृत्ते श्राद्धं प्राप्नोति शास्त्रवत् ॥ इति ।

पुत्रादिभिरिति शेषः । एतेन भर्त्तृप्रतिनिधिपादुकाद्वयादिना सहाग्निप्रवेशे प्रतिकृतिरूपपर्णनरदाहार्थस्त्रीसाहित्येऽपि कालान्तरे त्र्यहाशौचमेव कर्त्तव्यमित्युक्तम् । पैठीनसिः–

मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनात् ।
इतरेषां तु वर्णानां स्त्रीधर्मोऽयं परः स्मृतः ॥
उपकारं चरेद्भर्त्तुर्जीवन्ती न मृता तथा ।
करोति ब्राह्मणी श्रेयो भर्त्तुः शोकवती सदा ॥ इति ।

दानश्राद्धादिकं श्रेयः । अनुगमनपदोपादानाद्भर्त्तृशरीरं विना ब्राह्मण्याः शोकमोहादिना पश्चादग्निप्रवेशलक्षणमनुगमनं निषिध्यते । तथा च पारस्करः[२१९]–

मृते भर्त्तरि पूर्वेद्युर्मोहाच्चेत्तमनुव्रजेत् ।
सा स्वर्गमात्मघातेन नात्मानं न पतिं नयेत् ॥
बालसंवर्द्धनं त्यक्त्वा बालापत्या न गच्छति ।
रजस्वला सूतिका च रक्षेद्गर्भं च गर्भिणी ॥ इति ।

२१८- शुद्धितत्त्वे (स्मृतितत्त्वे द्वितीयभागे पृपृ- २३५-२३६) । मुद्रितब्रह्मपुराणे तु नोपलभ्यते । शुद्धिकौमुद्यां (पृ- ८३) व्यासवचनमप्येवम् ।
२१९- कालसारे(पृ-३२८) । शुद्धिकौमुद्यां (पृ-८३) बृहस्पतिवचनमपीत्थम्।

पूर्वेद्युः कालान्तरे भर्तृदेहं विनेति यावत् । एतदप्यर्थात् पैठीनस्युक्त-ब्राह्मणीपश्चादनुगमननिषेधविषयमेव । इतरवर्णस्त्रीणां पैठीनसिन्याय-ब्रह्मपुराणादिवाक्यैः कालान्तरेऽप्यग्निप्रवेशविधानात् । बालसंवर्द्धनम् इत्यादि चातुर्वर्णिकविषयमिति । विश्वामित्रव्याघ्रपादौ—

न म्रियते समं भर्त्रा ब्राह्मणी शोकमोहिता ।
प्रव्रज्यागतिमाप्नोति मरणादात्मघातिनी ॥ इति ।

अत्र यद्यपि ब्राह्मण्या भर्तृदेहमालिङ्ग्याग्निप्रवेशलक्षणं सहगमनं निषिद्धं तथापि शोकमोहोपादानात् शोकमोहवत्याः एव सहगमने आत्मघातेऽनिष्ट-फलमुक्तम् । अतः शोकमोहवती जीवन्ती ब्रह्मचर्यमाचरन्ती प्रव्रज्यागतिं प्राप्नोतीत्येतत् श्रेयः इत्यर्थः । शोकमोहवत्त्वे सति सर्वथा नाग्निप्रवेश इति तात्पर्यम् । अतएव विष्णुना[220] स्त्रीणां द्विविधा गतिरुक्ता । तथा च—

मृते भर्त्तरि ब्रह्मचर्यं तदन्वारोहणं वा । इति ।

अथ उदकदानम्—

पुत्राद्यसन्निधावन्यगोत्रोऽपि यथा मुखाग्निं ददाति तथा दशाहमध्ये पुत्रादावागतेऽपि दशाहसमाप्तिपर्यन्तं स एव प्रत्यहमुदकपिण्डदानं सम्पादयेत् । यथाऽऽह हारीतः[221]—

अन्यगोत्रोऽथ सम्बन्धी प्रेतायाग्निं ददाति यः ।
उदकं पिण्डदानं च स दशाहं समापयेत् ॥ इति ।

ब्राह्मे[222]— प्रथमेऽहनि यो दद्यात् प्रेतायान्नं समाहितः ।
यत्नान्नवसु चान्येषु स एव प्रददात्यपि ॥ इति ।

महाभारते-असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान् ।
प्रथमेऽहनि यो दद्यात् स दशाहं समापयेत् ॥ इति ।

एकादशाहादिकृत्यं मुख्याधिकारिण एवेति भावः । पारस्करः[223]—

संयुक्तं मैथुनं वोदकं याचेरन्नुदकं करिष्यामह इति । कुरुध्वं मा चैवं पुनरित्यशतवर्षे प्रेते । कुरुध्वमित्येवेतरस्मिन् । सर्वे ज्ञातयोपोभ्यवयन्त्या-सप्तमात्पुराषाद्दशामाद्वा । समानग्रामवासे यावत्सम्बन्धमनुस्मरेयुः ।

२२०- विष्णुस्मृतौ (२५/१४) ।
२२१- कृत्यक० शुद्धिकाण्डे (पृ- १०३) ।
२२२- हारलतायाम्(पृ- १६४) आदिपुराणवचनमेतत् ।
२२३- पारस्करगृह्यसूत्रे (३/१०/१३-२१) ।

एकवस्त्राः प्राचीनावीतिनः । सव्यस्यानामिकयापनोद्याप नः शोशुचदघमिति । दक्षिणामुखा निमज्जन्ति । प्रेतायोदकं सकृत्प्रसिञ्चन्त्यञ्जलिना असावेतत्त उदकम् । इति ।

संयुक्तं सम्बन्धिनम् । मैथुनं मिथुनसम्बन्धिश्यालकादिकमित्यर्थः । "अप नः" इति मन्त्रेण सव्यानामिकया जलधारां कृत्वेत्यर्थः । विष्णुः[२२४]–

यावदाशौचं तावत्प्रेतस्योदकं पिण्डमेकं च दद्युः । इति ।

पैठीनसिः[२२५]–

मृतं मनसा ध्यायन् दक्षिणामुखस्त्रीन् जलाञ्जलीन् निर्वपेत् । शावप्रभृत्येकादशाहे विरमेत् । इति ।

प्रचेताः[२२६]–

त्रिः प्रसेकं कुर्युः प्रेतस्तृप्यतु । इति ।

याज्ञवल्क्यः[२२७]–

सकृत्प्रसिञ्चत्युदकं नामगोत्रेण वाग्यताः ।
न ब्रह्मचारिणः कुर्युरुदकं पतितास्तथा ।। इति ।

व्यवस्थाविकल्पयोर्व्यवस्था बलीयसीतिन्यायादञ्जलिदानं पुत्रविषयं भ्रात्रादिक्रियाकर्त्तृविषयं च । एकाञ्जलिदानं तु ज्ञात्यादिविषयमेवेति भावः । तथा–

[२२८]एवं मातामहाचार्यप्रेतानामुदकक्रिया ।
कामोदकं सखिप्रत्तास्वस्त्रीयश्वशुरर्त्विजाम् ।। इति ।

गौतमः[२२९]–

उदकदानं सपिण्डैः कृतचूडस्य । दन्तजन्मादि मातापितृभ्याम् । इति । कर्त्तव्यमिति शेषः । इत्यादि स्वयमुहनीयमिति ।

अथ *शोकापनोदः*–

याज्ञवल्क्यः[२३०]–

२२४- विष्णुस्मृतौ (१९/१३) ।
२२५- कृत्यक० शुद्धिकाण्डे (पृ- ८३) ।
२२६- याज्ञवल्क्यमिताक्षरायाम्(३/५) ।
२२७,२२८- याज्ञवल्क्यस्मृतौ (३/५,४) ।
२२९- गौतमधर्मसूत्रे (२/५/३२, ४१) ।
२३०- याज्ञवल्क्यस्मृतौ (३/७-११) ।

कृतोदकान् समुत्तीर्णान् मृदुशाद्वलसंस्थितान् ।
स्नातानपवदेयुस्तानितिहासैः पुरातनैः ॥
मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम् ।
करोति यः स संमूढो जलबुद्बुदसंनिभे ॥
पञ्चधा संभृतः कायो यदि पञ्चत्वमागतः ।
कर्मभिः स्वशरीरोत्थैस्तत्र का परिदेवना ॥
गन्त्री वसुमती नाशमुदधिर्दैवतानि च ।
फेनप्रख्यः कथं नाशं मर्त्यलोको न यास्यति ॥
श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः ।
अतो न रोदितव्यं हि क्रियाः कार्याः प्रयत्नतः ॥ इति ।

अथ *पिण्डदानम्*—

प्रचेताः[२३१]—

पुत्रो भ्राता पिता वाऽपि मातुलो गुरुरेव च ।
एते पिण्डप्रदा ज्ञेयाः सगोत्राश्चैव बान्धवाः ॥ इति ।

पुत्रपदं पौत्राद्युपलक्षणम् । सगोत्राः सपिण्डाः, तदभावे समानोदकाः । पुत्रादि पूर्वम् । पूर्वाभावे उत्तरोत्तराधिकारः । पुत्राभावाधिकारे शङ्खः[२३२]-

भार्यापिण्डं पतिर्दद्याद्भर्त्रे भार्या तथैव च ।
श्वशुरादेः स्नुषा दद्यात्तदभावे द्विजोत्तमः ॥ इति ।

अपुत्रायाः पत्न्याः दुहितृसपत्नीपुत्राभावे पिण्डं पतिर्दद्यात् । तयोः सद्भावे तु न पतिर्दद्यात्, "अपुत्राया अपि क्वचित्" इति[२३३] छन्दोगपरिशिष्ट-निषेधात् । मात्स्ये—

प्रेतीभूतस्य सततं भुवि पिण्डं जलं तथा ।
सतिलं सकुशं दद्याद्बहिर्जलसमीपतः ॥ इति ।

असंस्कृतस्य भूमौ संस्कृतस्य कुशेषु दद्यादित्यर्थः । तथा—

[२३४]शालिना सक्तुभिर्वाऽपि शाकैर्वाऽप्यथ निर्वपेत् ।

२३१,२३२- हारलतायाम् (पृ- १७५) ।

२३३- कात्यायनस्मृतौ (२४/११) सम्पूर्णवचनं यथा—

न योषायाः पतिर्दद्यादपुत्राया अपि क्वचित् ।
न पुत्रस्य पिता दद्यान्नानुजस्य तथाऽग्रजः ॥ इति ।

२३४- याज्ञवल्क्यमिताक्षरायां (३/१६) शुनःपुच्छवचनमेतत् ।

प्रथमेऽहनि यद्द्रव्यं तदेव स्याद्दशाहिकम् ॥ इति ।

प्रथमे गृहीतं पिण्डद्रव्यमेव यावद्दशाहमित्यर्थः । इति ।

अथ *वेश्मप्रवेशनम्*–

याज्ञवल्क्यः[२३५]–

इति सञ्चिन्त्य गच्छेयुर्गृहं बालपुरःसराः ।
विदश्य निम्बपत्राणि नियता द्वारि वेश्मनः ॥
आचम्याथाग्निमुदकं गोमयं गौरसर्षपान् ।
प्रविशेयुः समालभ्य कृत्वाऽश्मनि पदं शनैः ॥
प्रवेशनादिकं कर्म प्रेतसंस्पर्शिनामपि ॥ इति ।

पूर्वोक्तं शोकापनोदं सञ्चिन्त्येत्यर्थः । पारस्करः[२३६]–

अनवेक्षमाणा ग्राममायान्ति रीतिभूताः कनिष्ठपूर्वाः । निवेशनद्वारे पिचुमन्दपत्राणि विदश्याऽऽचम्योदकमग्निं गोमयं गौरसर्षपांस्तैलमालभ्याश्मानमाक्रम्य प्रविशन्ति । त्रिरात्रं ब्रह्मचारिणोऽधःशायिनो न किञ्चन कर्म कुर्युर्न प्रकुर्वीरन् । क्रीत्वा लब्ध्वा वा दिवाऽन्नमश्नीयुरमांसम् । प्रेतायान्नं दत्त्वाऽवनेजनदानप्रत्यवनेजनेषु नामग्राहम् । मृण्मये तां रात्रिं क्षीरोदके विहायसि निदध्युः प्रेतात्र स्नाहीति । इति ।

न प्रकुर्वीरन् नारभेरन् । प्रेतात्र स्नाहीति वदन् जलपूर्णमृण्मयपात्रमाकाशे स्थापयति, प्रेतेदं पिबेति क्षीरपूर्णं चेत्यर्थः । मनुः[२३७]–

अक्षारलवणान्नाः स्युर्निमज्जेयुश्च ते त्र्यहम् ।
मांसाशनं च नाश्नीयुः शयीरंश्च पृथक्क्षितौ ॥ इति ।

गौतमः[२३८]–

अधःशय्यासनिनो ब्रह्मचारिणः सर्वे । न मार्जयीरन् । न मांसं भक्षयेयुराप्रदानात् । इति ।

न मार्जयीरन् अङ्गानि वस्त्रादीनि चेति । अत्र ब्रह्मचर्याक्षारादिभोजननियमस्य मनुपारस्करादिवचनमात्राद्यवगमात् । गौतमवचने च आप्रदानात् इति एकादशाहश्राद्धविहितमांसप्रदानादर्वागिति । अशौचान्तपर्यन्ताव-

२३५- मुद्रितयाज्ञवल्क्यस्मृतौ (३/१२-१४) सञ्चिन्त्य-स्थाने संश्रुत्य-पाठः ।
२३६- मुद्रितपारस्करगृह्यसूत्रे(३/१०/२३-२८) 'गोमयं..प्रविशन्ति' नास्ति ।
२३७- मनुस्मृतौ (५/७३) ।
२३८- गौतमधर्मसूत्रे (२/५/३५-३७) ।

गमाच्च व्यवस्था अवगम्यते । पौत्राद्यधिकारे बौधायनः[२३९]—

दशाहं कटमासीरन् । यथासन्नं त्रिरात्रमहोरात्रमेकाहमिति कुर्वीत । इति ।

कटः कुशादितृणप्रस्तरासनं शयनायेत्यर्थः । श्रीविष्णुपुराणे[२४०]—

शय्यासनोपभोगश्च सपिण्डानामपीष्यते ।
भस्मास्थिचयनादूर्ध्वं संयोगो न तु योषिताम् ॥ इति ।

मार्कण्डेयपुराणे[२४१]—

तैलाभ्यङ्गो बान्धवानामङ्गसंवाहनं ततः ।
तेन चाप्यायते जन्तुर्यच्चाश्नन्ति स्वबान्धवाः ॥ इति ।

महाभारते[२४२]—

तिलान् ददत पानीयं दीपं ददत जाग्रत ।
ज्ञातिभिः सह मोदध्वमेतत् प्रेतेषु दुर्लभम् ॥ इति ।

अथ *अस्थिसञ्चयनविधिः*—

[२४३]चतुर्थे दिवसे अस्थिसञ्चयनं कुर्युः । तेषां गङ्गाम्भसि प्रक्षेपः ।

यावदस्थि मनुष्यस्य गङ्गाम्भसि च तिष्ठति ।
तावद्वर्षसहस्राणि स्वर्गलोकेऽपि तिष्ठति ॥ इति ।

कात्यायनः[२४४]—

सञ्चयनं चतुर्थ्यामयुग्मान् ब्राह्मणान् भोजयित्वा पलाशवृन्तेनास्थीनि परिवर्त्याङ्गुष्ठकनिष्ठिकाभ्यामादाय पलाशपुटे प्रास्यति । शम्यवकाः कर्दमं च श्मशाने । अक्त्वास्थीनि सर्वसुरभिमिश्राणि दक्षिणपूर्वायतां कर्षूं खात्वा कुशानास्तीर्य वस्त्रावृकृत्तं च हारिद्रं वागिति निवपत्यस्मिन् । एतद्वाजसनेयकम् । अनेन वा । वामनसा नार्तेन वाचा ब्रह्मणा त्रय्या विद्यया पृथिव्यामक्षिकायामपां रसे निवपाम्यसाविति । श्मशानं चिकीर्षतः कुम्भे सञ्चयनम् । निधानं च तूष्णीम् । इति ।

२३९- बौधायनधर्मसूत्रे (१/५/११/२२, २५) ।
२४०- विष्णुपुराणे (३/१३/१६) ।
२४१- कृत्यक० शुद्धिकाण्डे (पृ-१०२) हारलतायां (पृ-१६०) च ।
२४२- हारलतायां (पृ-१६०) । कृत्यक० शुद्धिकाण्डे (पृ- १०२) तु 'सतिलं घृतपानीयम्' इति प्रथमपादे पाठः ।
२४३- विष्णुस्मृतौ (१९/१०-१२) ।
२४४- कात्यायनश्रौतसूत्रे(२५/८/१-८) ।

चतुर्थ्यां तिथौ अयुग्मविप्रभोजनमपि श्राद्धोपलक्षणम् । प्रास्यति प्रक्षिपति । शमीपत्रशैवालकर्दमैरस्थीन्यक्त्वा श्मशाने कृष्णरेखामध्ये दक्षिणाग्रकुशास्तरणहारिद्रवस्त्रखण्डोपरि अस्थिनिधानम् । वागित्येकाक्षरमन्त्रेण वाजसनेयिनाम् । अन्येषामन्येन ग्रन्थान्तरेण चेत्यर्थः । छन्दोगपरिशिष्टम्[२४५]—

अपरेद्युस्तृतीये वा अस्थ्नां सञ्चयनं भवेत् ।
यस्तत्र विधिरादिष्ट ऋषिभिः सोऽधुनोच्यते ॥
स्नानान्तं पूर्ववत् कृत्वा गव्येन पयसा ततः ।
सिञ्चेदस्थीनि सर्वाणि प्राचीनावीत्यभाषयन् ॥
शमीपलाशशाखाभ्यामुद्धृत्योद्धृत्य भस्मनः ।
आज्येनाभ्यज्य गव्येन सेचयेद्गन्धवारिणा ॥
मृत्पात्रसम्पुटं कृत्वा सूत्रेण परिवेष्ट्य च ।
श्वभ्रं खात्वा शुचौ भूमौ निखनेद्दक्षिणामुखः ॥
पूरयित्वा घटं पङ्कपिण्डशैवालसंयुतम् ।
दत्त्वोपरि समं शेषं कुर्यात् पूर्वाह्णकर्मणा ॥
एवमेवागृहीताग्नेः प्रेतस्य विधिरिष्यते ।
स्त्रीणामिवाग्निदानं स्यादथातोऽनुक्तमुच्यते ॥ इति ।

एष एव विधिरुभयाग्निरहितस्य स्त्रीणां चापीत्यर्थः ।

[२४६]येऽत्र श्मशाने देवाः स्युर्भगवन्तः सनातनाः ।
तेऽस्मत्सकाशाद्गृह्णन्तु बलिमष्टाङ्गमक्षयम् ॥
प्रेतस्यास्य शुभान् लोकान् प्रयच्छन्त्वपि शाश्वतान् ।
अस्माकमायुरारोग्यं शुभं च ददतां वरम् ॥ इति ।

अथ *दशाहविधिः*—

तत्र हारीतः[२४७]—

दशमेऽहन्यरण्यं गत्वा कृतश्मश्रुकर्माणः स्पृष्टान्युत्सृज्य तिलकल्कावघुष्टा गौरसर्षपैः शिरःस्नाता अहतवाससः शुक्लवाससो वा अश्माविष्टा गोहिरण्यादीन्यालभ्य प्रविशेरन् । शान्तिं कृत्वा श्वोभूत एकोद्दिष्टं प्रदाय

२४५- कात्यायनस्मृतौ (२३/९-१४) ।
२४६- हारलतायाम् (पृ- १८७) आदिपुराणवचनमेतत् ।
२४७- कृत्यक० शुद्धिकाण्डे (पृ-१०४) हारलतायां (पृ- १९४) च ।

स्वस्त्ययनादिधर्मार्थान् प्रवर्त्तयन्ति । इति ।

अरण्यं ग्रामाद्बहिः । श्मश्रुकर्म क्षौरम् । स्पृष्टानि वस्त्रादीनि । अरिष्टो निम्बः । श्वोभूते एकादशाहे आद्यश्राद्धमेकोद्दिष्टं प्रदापयेदित्यर्थः ।

[२४८]यस्य यस्य तु वर्णस्य यदि स्यात् पश्चिमं त्वहः ।
स तत्र वस्त्रशुद्धिं च गृहशुद्धिं करोत्यपि ॥
समाप्य दशमं पिण्डं यथाशास्त्रमुदाहृतम् ।
ग्रामाद्बहिस्ततो गत्वा प्रेतस्पृष्टे च वाससी ॥
अन्त्यानामाश्रितानां च त्यक्त्वा स्नानं करोति सः ।
श्मश्रुलोमनखानां च यत्त्याज्यं तज्जहात्यपि ॥
गौरसर्षपकल्केन तिलतैलेन संयुतः ।
शिरःस्नानं पुनः कृत्वा तोयेनाचम्य वाग्यतः ॥
वासो युग्मं नवं शुक्लमव्रणं शुद्धमेव वा ।
गृहीत्वा गां सुवर्णं च मङ्गलानि शुभानि च ॥
स्पृष्ट्वा सङ्कीर्त्तयित्वा च पश्चाच्छुद्धो भवेन्नरः ॥ इति ।

मृतस्पृष्टवासांसि प्रेतक्रियासम्बन्धिनीत्यर्थः ।

एकादशाहविधिः—

मत्स्यपुराणे[२४९]—

सूतकान्ताद्द्वितीयेऽह्नि शय्यां दद्याद्विलक्षणाम् ।
काञ्चनं पुरुषं तद्वत् फलवस्त्रसमन्विताम् ॥
सम्पूज्य द्विजदाम्पत्यं नानाऽऽभरणभुषणैः ।
वृषोत्सर्गं प्रकुर्वीत देया च कपिला शुभा ॥ इति ।

एकादशाहे श्राद्धदक्षिणाब्राह्मणभोजननानादानानि चोक्तानि । तथा च बृहस्पतिः—

एकोद्दिष्टविधानेन यदैवास्य विधीयते ।
आवाहनाग्नौ करणरहितं दैवदर्जितम् ॥
वस्त्रालङ्कारशय्यादि पितुर्यद्वाहनायुधम् ।
गन्धमाल्यैः समभ्यर्च्च्य श्राद्धभोक्त्रे तदर्पयेत् ॥
भोजनं चानेकविधं कारयेद्व्यञ्जनानि च ।

२४८- हारलतायाम् (पृ- १९७) आदिपुराणवचनमेतत् ।
२४९- मत्स्यपुराणे (१८/१२-१४) ।

यथाशक्ति प्रदद्याच्च भूमिहेमादिकं तथा ॥
श्रोत्रिया भोजनीयास्तु नव सप्त त्रयोदश ।
ज्ञातयो बान्धवा निष्ठास्तथा वाऽतिथयोऽपरे ॥ इति ।

राजधर्मे वशिष्ठः—

राजनि च प्रेते दद्यात् प्रासङ्गिकम् । इति ।

पित्रोराब्दिकादिश्राद्धान्तरेऽपि प्रासङ्गिकं शय्याऽऽसनादिकं देयमित्यर्थः ।

छन्दोगपरिशिष्टम्[२५०]—

द्वादश प्रतिमास्यानि आद्यं षाण्मासिकं तथा ।
सपिण्डीकरणं चैव प्रेतश्राद्धानि षोडश ॥ इति ।

अत्र सपिण्डीकरणमादाय प्रेतश्राद्धानां षोडशत्वं विवक्षितम् । केचित्तु सपिण्डीकरणस्य पितृगणान्तर्भावे मात्रोपयुक्तत्वात् त्रैपक्षिकश्राद्धेनैव षोडशत्वमिच्छन्ति । तथा च जाबालिः—

एकादशाहे त्रिपक्षे षण्मासे चाब्दिकेऽपि च ।
प्रतिमासं दशाहे च श्राद्धान्येतानि षोडश ॥
यस्यैतानि न कुर्वीत एकोद्दिष्टानि षोडश ।
पिशाचत्वं ध्रुवं तस्य दत्तैः श्राद्धशतैरपि ॥ इति ।

याज्ञवल्क्यः[२५१]—

मृतेऽहनि प्रकर्त्तव्यं प्रतिमासं तु वत्सरम् ।
प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि ॥ इति ।

अथ *सपिण्डीकरणम्*—

अशौचान्ते दशाहपतितेऽग्निमान् मासिकश्राद्धानि सपिण्डीकरणं च कृत्वा पिण्डपितृयज्ञमवश्यं कुर्यादिति । बृहस्पतिः—

द्वादशैकादशे चाह्नि साग्निः कुर्यात् सपिण्डनम् ।
शावाशौचस्य मध्येऽपि कुर्यादेवाविशङ्कयन् ॥
वृद्धिश्राद्धी गयां गच्छन् साग्निः सन्दर्शनात् पितुः ।
तथैव पुत्रिकापुत्रः कुर्यात्सद्यः सपिण्डनम् ॥ इति ।

शावाशौचस्याब्दादिमध्याशौचस्येत्यर्थः । उक्तं च—

पितुरब्दमशौचं स्यात् षण्मासं मातुरेव च ।

२५०- कात्यायनस्मृतौ (२४/८) 'एतद्वै श्राद्धषोडशम्' इति चतुर्थपादपाठः ।
२५१- याज्ञवल्क्यस्मृतौ (१/२५६) ।

मासत्रयं तु भार्यायास्तदर्द्धं भ्रातृपुत्रयोः ।। इति ।

मृताविति सर्वत्र शेषः । एतत्तु महादानकाम्यविशेषनियमे वेति । कात्यायनः[२५२]–

ततः संवत्सरे पूर्णे त्रिपक्षे वा यदहर्वा वृद्धिरापद्यते । इति ।

सपिण्डीकरणं कुर्यादित्यर्थः । पुत्रवत एव सपिण्डीकरणं कार्यम्, नापुत्रस्य लोकोऽस्तीत्यादिश्रवणात् ।

एतत्सपिण्डीकरणमेकोद्धिष्टं स्त्रिया अपि ।

इति [२५३]याज्ञवल्क्यवचनात् पुत्रवत्या एव । तथा च–

सपिण्डीकरणं नास्ति अपुत्रस्य द्विजन्मनः ।
अशौचमुदकं पिण्डमेकोद्दिष्टं न पार्वणम् ।।
अपुत्रा वा मृताः केचित् पुरुषा वा स्त्रियोऽपि वा ।
तेषामपि न कार्यं स्यादेकोद्दिष्टं च पार्वणम् ।। इति ।

सपिण्डीकरणाभावे पार्वणाभाव इत्यर्थः । वृद्धशातातपः–

मातुः सपिण्डीकरणं कथं कार्यं सुतैर्भवेत् ।
पितामह्या सहैवास्याः सपिण्डीकरणं स्मृतम् ।। इति ।

पितामह्यादिभिः सह मातृसपिण्डनं वाजसनेयिनाम् । छन्दोगानां तथैव । शिष्टाचारदर्शनात् । सपिण्डीकरणोत्तरश्राद्धविषये–

यंत्र यत्र प्रदातव्यं सपिण्डीकरणात्परम् ।
पार्वणेन विधानेन देयमाग्निमता सदा ।।

इति [२५४]मत्स्यपराणवचनात् । तथा च–

औरसक्षेत्रजौ पुत्रौ विधिना पार्वणेन तु ।
प्रत्यब्दमितरे कुर्युरेकोद्धिष्टं सुता दश ।।

इति जाबालिवचनाच्चावगम्यते । सपिण्डीकरणात्परमपि अमावास्यादिपार्वणश्राद्धानि पिण्डपितृयज्ञविधिनैव कुर्युः । प्रत्याब्दिकं श्राद्धं तु साग्निकावौरसक्षेत्रजौ पुत्रौ पार्वणेन विधानेन कुर्याताम् । निरग्निकावेतावन्येऽपि दशप्रकाराः पुत्राः साग्निका निरग्निका वा एकोद्दिष्टमेव कुर्युरिति केचिन्मन्वते । अन्ये तु सपिण्डनादूर्ध्वं सर्वेषामपि सांवत्सरिकं

२५२- याज्ञवल्क्यमिताक्षरायाम् (१/२५५) ।
२५३- याज्ञवल्क्यस्मृतौ (१/२५४) ।
२५४- मुद्रितमत्स्यपुराणे (१६/५८) 'पार्वणेन' स्थाने 'तत्रानेन' पाठः ।

स्मृत्यर्णवादुद्धृतसारशीकरैः पूता
बुधाः सज्जनमज्जनोचिता ।
कृताऽतिसेव्या सुरसा मलापहा
विगाह्यतां शुद्धिविधानवापिका ॥ २७ ॥

॥ इतिश्रीकालिदासचयनिकृतौ शुद्धिचन्द्रिका समाप्ता ॥

***

श्राद्धं त्रैपुरुषिकमेवेति । तथा च मनुः[२५५]–

सहपिण्डक्रियायां तु कृतायामस्य धर्मतः ।
अनयैवावृता कार्यं पिण्डनिर्वपणं सुतैः ॥ इति ।

अनयैवेति सपिण्डीकरणविधिपरामर्शेणाब्दिकादिसकलनिर्वपणं त्रैपुरुषिकमेवेत्युक्तं भवति । अतएव कर्काचार्यः[२५६]–

सपिण्डीकरणात्प्राक् सर्वमेव श्राद्धमेकोद्दिष्टम् । ऊर्ध्वं च पार्वणम् । अन्यत्राभ्युदयात् । इति ।

अतस्तुल्यबलविरोधे विकल्पः । अग्निमतोः औरसक्षेत्रजयोः पार्वणनियमः । इतरेषां विकल्प इति । अतएव लोके प्रत्याब्दिक उभयश्राद्धे उभयविधिसमाचारो दृश्यत इति सर्वमवदातम् । मृताहे भुरिभोजनं यथाशक्तिश्राद्धादिकं च कार्यम् । तथा चोक्तम्–

जीवतो वाक्यकरणान्मृताहे भुरिभोजनात् ।
गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता ॥ इति ।

इत्यादि ग्रन्तविस्तरभयादस्माभिर्दिङ्मात्रं दर्शितम् । विस्तरश्च निबन्धान्तरेषु द्रष्टव्यः । स्वयमप्यूहनीय इति ॥ २६ ॥

पूर्वं शुद्धिविधानमभिहितम् । सम्प्रति कारणाभिधानपुरःसरं ग्रन्थस्योपादेयतामाह–स्मृत्यर्णवेति । स्मृतय एवार्णवः । विस्तारगम्भीरतया दूरवगाह्याः, तत उद्धृता ये सारा उपयुक्तभागास्त एव स्वल्पतया शीकरत्वेन रूपितास्तैः कृता शुद्धिविधानवापिका । भो बुधाः । एषा विगाह्यताम् । विशेषेण गाह्यतामित्यर्थः । शुद्धेः शौचस्य विधानं यस्मिन् स ग्रन्थः शुद्धिविधानाख्यः । स एव विमलीकरणरूपशुद्धिहेतुभूतवापिकात्वेन

२५५- मनुस्मृतौ (३/२४८) ।
२५६- मुद्रितपारस्करगृह्यसूत्रकर्कभाष्ये(३/१०/५४) ''अन्यत्राभ्युदयात्'' इति भागो नास्ति ।

निरूपितः । पूताः पवित्रकरणहेतवः । अतएव सज्जनमज्जनायोचिता । अतिशयसेव्या संक्षिप्ततया स्वल्पाऽपि विशदभावेन कृत्स्नार्थं प्रतिपादयति। सुरसा अतिरसप्रदेत्यर्थः । अन्तेऽपि ग्रन्थस्य प्रयोजनमाह–मलापहेति । अज्ञानदुर्ज्ञानरूपं मलमपहन्तीति भावः । एतदुक्तं भवति । यथाऽर्णवो विस्तरगम्भीरविरसत्वादिना दुरवगाह्यास्तथाऽऽविलजललवणत्वादिना न शरीरमलापहाः । अतएव न तादृक् सेवायोग्याः । तद्वत् स्मृतयोऽपीत्यर्थः।

अत एवोद्धृतैः कृता वापी । साऽतिशयसेवायोग्या भवति । सर्वेषां तत्तत्स्मृतिपुराणेभ्य एवोद्धृतैः सारभूतवाक्यैः कृतोऽयं संक्षिप्तकृत्स्नार्थाभिधायकः पञ्चविंशतिपद्यरूपः शुद्धिविधानग्रन्थः शुद्धिचन्द्रिकाख्यः। सज्जनानां विदुषां परमोपादेय इत्यर्थः ।

॥ इतिश्रीकालिदासकृतायाः शुद्धिचन्द्रिकायाः
विद्यावागीशकृता टीका समाप्ता ॥

***

प्रभाकृद्विवृतिः

भरद्वाजकुलोत्पन्नानाचार्यकुलमण्डनान् ।
मिश्रोपाह्वान् गुरुश्रेष्ठान् श्रीकुलमणिसंज्ञकान् ॥
प्रणम्य कालिदासान् च विद्यावागीशपण्डितान् ।
प्रभाख्यां टिप्पणीं ज्ञानां करोमि प्रीतिवर्द्धिनीम् ॥
काश्यपकुलसम्भूतो नवघनः सदाशयः ।
यदुनाथ इति श्रीमान् विवेकवान् तदात्मजः ॥
वर्णकर्मरतो नित्यं विप्रवैष्णवपूजकः ।
श्रद्धाशीलो मृदुर्दान्तो न परद्रोहकर्मधीः ॥
सर्वेऽप्यमी दिवं प्राप्ताः पुण्यकर्मपरायणाः ।
शुभाशिषप्रदानेन कृतार्थयन्तु मां सदा ॥
यदुनाथात्मजः सोऽयं विश्वनाथोऽल्पचेतनः ।
गुरुकृपावशात् यत्तु प्राप्तं तत् प्रत्यपादयत् ॥
सद्भिश्चेदत्र विद्वद्भिर्न्यूनता पूरयिष्यते ।
तेन धन्यो भविष्यामि यत्नो मे सार्थको भवेत् ॥

***

सहायकग्रन्थसूची

१. काव्यादर्शः- चौखम्बाविद्याभवन, वाराणसी, १९८४ खीष्टाब्दः ।
२. मनुस्मृतिः मन्वर्थमुक्तावलीसहिता- चौखम्बा, १९७० खीष्टाब्दः ।
३. याज्ञवल्क्यस्मृतिः मिताक्षरासहिता- चौखम्बा, १९६७ खीष्टाब्दः ।
४. याज्ञवल्क्यस्मृतिः वीरमित्रोदयसहिता- चौखम्बा,१९३० खीष्टाब्दः ।
५. अग्निपुराणम्- चौखम्बा,१९६६ खीष्टाब्दः ।
६. बौधायनधर्मसूत्रम्- चौखम्बा,१९७२ खीष्टाब्दः ।
७. कात्यायनश्रौतसूत्रम्- चौखम्बा,१९७२ खीष्टाब्दः ।
८. हारलता- एसियाटिक् सोसाइटी, कलकत्ता, १९०९ खीष्टाब्दः ।
९. कालसारः- एसियाटिक् सोसाइटी, कलकत्ता, १९०४ खीष्टाब्दः ।
१०. विष्णुस्मृतिः- एसियाटिक् सोसाइटी, कलकत्ता, १८८१ खीष्टाब्दः ।
११.शुद्धिकौमुदी- एसियाटिक् सोसाइटी, कलकत्ता, १९०५ खीष्टाब्दः ।
१२.पराशरमाधवीयम्-एसियाटिक् सोसाइटी,कलकत्ता, १९७४ खीष्टाब्दः ।
१३.छन्दोगपरिशिष्टम्- एसियाटिक् सोसाइटी, कलकत्ता ।
१४.कृत्यकल्पतरुः-शुद्धिकाण्डः- वरोदाप्रकाशनम्, १९५० खीष्टाब्दः ।
१५.स्मृतिचन्द्रिका- आशौचकाण्डः- महीशूरप्रकाशन्, १९२१ खीष्टाब्दः ।
१६.मत्स्यपुराणम्- मेहरचन्दलछमनदासः, दिल्ली, १९८४ खीष्टाब्दः ।
१७.निर्णयसिन्धुः- निर्णयसागरप्रेस, मुम्बई, १९४९ खीष्टाब्दः ।
१८.आङ्गिरसस्मृतिः- आड्यार लाइब्रेरी, मद्रास, १९५३ खीष्टाब्दः ।
१९.नारदस्मृतिः- सर्वकारीयसंस्कृतमहाविद्यालयः, कलकत्ता ।
२०.ब्रह्मपुराणम्- हिन्दीसाहित्यसम्मेलन, प्रयागः, १९७६ खीष्टाब्दः ।
२१.विष्णुपुराणम्- नागप्रकाशनम्, दिल्ली, १९८५ खीष्टाब्दः ।
२२.पारस्करगृह्यसूत्रम्-मणिलाल इच्छा० देशाई, मुम्बई,१९१७ खीष्टाब्दः।
२३.वशिष्ठधर्मशास्त्रम्- भण्डारकरप्रतिष्ठानम्, पुणे, १९३० खीष्टाब्दः।
२४.कूर्मपुराणम्- ईण्डलजिकाल् बुक् हाउस्, वाराणसी,१९६७ खीष्टाब्दः।
२५.शुद्धितत्त्वम्- जीवानन्दविद्यासागरसम्पादितम्, कलकत्ता ।
२६.गौतमधर्मसूत्राणि-कुलमणिमिश्रसम्पादितानि, पुरी, १९९१ खीष्टाब्दः ।
२७. देवलस्मृतिः, अङ्गिरःस्मृतिः, यमस्मृतिः, कात्यायनस्मृतिः, दक्षस्मृतिः, पराशरस्मृतिः, अत्रिसंहिता, बृहस्पतिस्मृतिः, शङ्खस्मृतिः ।
—आनन्दाश्रमग्रन्थमाला ।
२८. संवर्त्तस्मृतिः, वृहद्यमस्मृतिः, शङ्खलिखितस्मृतिः, लघुहारितस्मृतिः, वृहद्धारितस्मृतिः, प्रजापतिस्मृतिः, लघुशङ्खस्मृतिः, अत्रिस्मृतिः ।
-क्षमराजप्रकाशनम्, मुम्बई, १८४६ शकाब्दः ।
२९. शुद्धिसर्वस्वम्- विश्वनाथस्वाईं सम्पादितम्, पुरी, १९९३ खीष्टाब्दः ।

उद्धृतवचनसूची

THE AUTHOR

Dr. Biswanath Swain was born on 13 3. 1958 at the Village of Adhanga in the District of Kendrapara, Orissa. He was educated in traditional line upto Ph.D. under Rashtriya Sanskrit Sansthan, New Delhi. He is a good and unassuming scholar of Dharmashastra. He has several articles and books to his credit. His two critical works **Suddhi Sarvasva** and **Kala Sarvasva** have brought fame to him. His research is sound in many aspects.

Dr. Swain is presently serving as a lecturer in the Deptt. of Dharmashastra in Sri. Jagannath Veda Karmakanda Mahavidyalaya, Puri, Orissa.